राय तत्पादपंकजाश्रमनिषेविणि देविशासनदेवते त्रि
भुवनजनसंक्षोभिणि त्रैलोक्याशिवापहारिणी परविद्या
च्छेदिनि परमंत्रप्रणाशिनि अष्टमहानागकुलोच्चाटनिका
लदंष्ट्रमृतकोत्थापिनि सर्वरोगप्रमोचिनि ब्रह्मविष्णुरुद्रें
द्रचंद्रादित्यनक्षत्रोत्पातमरणभयपीडाप्रमर्द्दिनि त्रैलोक्य

ज्वाला०
१४४

महिते नभलोकहितंकरे विश्वलोकवशंकरे महाभैरव
भैरवरूपधारिणि महारौद्ररूपधारिणि प्रसिद्धसिद्धविद्या
धरयक्षराक्षसगरुडगंधर्वकिंनरकिंपुरुषदैत्योरगेंद्र
पूजिते ज्वालामालदिगंतराले महामहिषवाहिनी खड्ग
पाणित्रिशूलशक्तिचक्रपाशशरासनशंखविराजमाने षो
डशार्धभुजे एहि२ ऊँ म्ल्व्र्यूं ज्वालामालिनि ह्रांक्लींब्लूंद्रांद्रीं
ह्रांह्रींह्रूंह्रौंह्रः ह्रीं देवतानाकर्षय२ नागग्रहानाकर्षय२
यक्षग्रहानाकर्षय२ गंधर्वग्रहानाकर्षय२ ब्रह्मग्रहानाक
र्षय२ राक्षसग्रहानाकर्षय२ भूतग्रहानाकर्षय२ व्यंतर
ग्रहानाकर्षय२ सर्वदुष्टग्रहानाकर्षय२ कंप२ कंपावय२ शी

र्षं चालय२ गात्रं चालय२ वाक्यं चालय२ सर्वांगं चालय२ लो
लय२ धुनु२ कंपय२ शीघ्रमवतारय२ गृह्ण२ ग्राहय२ आ
वेशय२ म्ल्व्र्यूं ज्वालामालिनि ह्रांह्रींक्लींब्लूंद्रांद्रीं२ ज्वल२
प्रज्वल२ रररररर धग२ धूम्रांधकारिणि ज्वलज्वलनशिखे दे
वग्रहान् दह२ नागग्रहान् दहदह यक्षग्रहान् दह२ गंधर्व
ग्रहान् दह२ ब्रह्मग्रहान् दह२ राक्षसग्रहान् दह२ भूतग्रहा
न् दह२ व्यंतरग्रहान् दह२ सर्वदुष्टग्रहान् दह२ शतकोटि
देवान् दह२ सहस्रकोटिपिशाचानां राज्ञो दह२ घेघे स्फोट
य२ मारय२ धगधगिनिमुखे ज्वालामालिनि ह्रांह्रींह्रूंह्रौंह्रः
सर्वशत्रुच्छेदयं दह२ पच२ छिंद२ भिंद२ दहहाहाऊट् घेघे

क्ष्म्ल्व्र्यूं क्षांक्षींक्षूंक्षौंक्षः स्तंभय२ म्म्ल्व्र्यूं ग्रांग्रींग्रूंग्रौंग्रः ना
मय२ म्म्ल्व्र्यूं म्रांम्रींम्रूंम्रौंम्रः नेत्रंस्फोटय२ दर्शय२ घ्म्ल्व्र्यूं
घ्रांघ्रींघ्रूंघ्रौंघ्रः ज्वरंभेदय२ झ्म्ल्व्र्यूं झ्रांझ्रींझ्रूंझ्रौंझ्रः मुष्टि
वंधेनवंधय२ ब्म्ल्व्र्यूं ब्रांब्रींब्रूंब्रौंब्रः अंत्राणिछेदय२ खं
र्म्ल्व्र्यूं खांखींखूंखौंखः पाशास्त्रेणहन२ ब्म्ल्व्र्यूं ज्रांज्रीं
ज्रूंज्रौंज्रः सप्तकुंभजाय२ फ्रांफ्रीं सर्वडाकिणीमर्दय२ सर्वयो
गिणीश्चूर्णय२ सर्वशत्रून्ग्रासय२ खखखखखादय२
सर्वदैत्यान्विध्वंसय२ सर्वमृत्युनाशय२ सर्वोपद्रवा
न्स्तंभय२ यः यः परु२ खरु२ क्षंक्षं रावणसुविद्यांघातय२
सर्वंद्रहासखड्गेनछेदय२ भेदय२ भरु२ क्षरु२ हरु२ फट्

२ घेघे ज्वांज्वौं ह्रांह्रींह्रौं ज्वालामालिन्याज्ञापयति स्वाहा ॥ इ
ति श्रीचंद्रप्रभशासनदेवताज्वालामालिनीस्तुतिःसंपूर्णा ॥
॥ अथ जिनपंजरस्तोत्रं लिख्यते ॥ ॐ ह्रीं श्रीं अर्हं अर्हद्भ्यो
नमोनमः ॐ ह्रीं श्रीं अर्हं सिद्धेभ्यो नमोनमः ॐ ह्रीं श्रीं अर्हं आ
चार्येभ्यो नमोनमः ॐ ह्रीं श्रीं अर्हं उपाध्यायेभ्यो नमोनमः ॐ ह्रीं
श्रीं अर्हं श्रीगौतमस्वामिप्रमुखसर्वसाधुभ्यो नमोनमः ॥१॥ ए
षः पंचनमस्कारः सर्वपापक्षयंकरः मंगलानांच सर्वेषां प्रथमं
भवति मंगलं ॥२॥ ॐ ह्रीं श्रीं जये विजये अर्हं परमात्मने नमः
कमलप्रभसूरींद्रो भाषते जिनपंजरं ॥३॥ एकभक्तोपवासेन
त्रिकालंयपठेदिदं मनोभिलषितं सर्वं फलं सलभते ध्रुवं ॥

॥४॥ न्द्रसय्याद्रत्नवर्येण श्रोत्रोद्धलोम्नविवर्जितः देवता
ग्रेपवित्रात्मा षण्मासैर्लभतेफलं ॥५॥ अर्हंतं स्थापयेन्मूर्द्ध्नि
सिद्धंचक्षुर्ललाटके आचार्यश्रोत्रयोर्मध्ये उपाध्यायंतु ना
शिके ॥६॥ साधुवृंदंमुखस्याग्रे मनःशुद्धिंविधायच सूर्यचंद्र
निरोधेनसुधासर्वार्थसिद्धये ॥७॥ दक्षिणेमदनद्वेषी वामपार्श्वे
स्थितोजिनः अंगसंधिषुसर्वज्ञः परमेष्ठिशिवंकरः ॥८॥ पूर्वा
शांश्रीजिनोरक्षेदाग्नेयांविजितेंद्रियः दक्षिणाशांपरंब्रह्म
नैरृत्यांचत्रिकालवित् ॥९॥ पश्चिमाशांजगन्नाथोवायवींप
रमेश्वरः उत्तरांतीर्थकृत्सर्व ईशानींचनिरंजनः ॥१०॥ पाता
लंभगवानर्हन्नाकाशंपुरुषोत्तमः रोहिणीप्रमुखादेव्यो

रक्षंतुसकलंकुलं ॥११॥ ऋषभोमस्तकंरक्षेदजितोपिविलोचनं
संभवकर्णयुगलेभिनंदनस्तुनाशिकां ॥१२॥ ओष्ठौश्रीसुमतिः
रक्षेद्दंतान्पद्मप्रभोजिनः जिह्वांसुपार्श्वदेवोयं तालुचंद्रप्रभा
धिपः ॥१३॥ कंठंश्रीसुविधिरक्षेत् हृदयंश्रीसुशीतलं श्रेयांसो
ज. बाहुयुगलं वासुपूज्यःकरद्वयं ॥१४॥ अंगुलीर्विमलोरक्षेदनंतो
सोनखानपि श्रीधर्मोप्युदरस्थायि श्रीशांतिर्नाभिमंडलं ॥१५॥
श्रीकुंथुर्गुह्यकंरक्षेदरोरोमकटीतटे मल्लिरूरूपृष्ठिवंशोपि
जिंघांमुनिसुव्रतः ॥१६॥ पादांगुल्यौनमिरक्षेत् श्रीनेमिश्चरणा
द्वयं श्रीपार्श्वनाथसर्वांगं वर्द्धमानश्चिदात्मकं ॥१७॥ पृथिवी
जलतेजस्कवाय्वाकाशमयंजगत् रक्षेदशेषपापेभ्यो वीत

जिन०
१५७

रागोनिरंजनः ।१७। राजद्वारेस्मशानेवासंग्रामेसत्रुसंकटे
व्याघ्रचौराग्निसर्पादिभूतप्रेतभयाश्रिते ।१८। अकालमरणे
प्राप्तेदरिद्रापत्समाश्रिते । अपुत्रत्वेमहादुःखेमूर्खत्वेरोगपी
डिते ।१९। डाकिनीशाकिनीग्रस्तेमहाग्रहगणार्दिते । नद्युत्तारे
ध्वविषमेव्यसनेचापदिस्मरेत् ।२१। प्रातरेवसमुत्थाय । यःस्मरे
ज्जिनपंजरं । तस्यकिंचिद्भयंनास्तिलभतेसुखसंपदं ।२२। जि
नपंजरनामेदं यःस्मरेदनुवासरं कमलप्रभसूरींद्र श्रियंस
लभतेनरः ।२३। प्रातःसमुत्थायपवित्रकृतज्ञः यःस्तोत्रमेतज्जि
नपंजरस्य । आसादयेत्सकमलप्रभाख्यांलक्ष्मीमनोवांछ
छितपूरणाय ।२४। श्रीरुद्रपल्लीयवरेणगच्छेदेवप्रभाचार्यप

दाब्जहंसः वादींद्रचूडामणिरेषजैनोजीयादसौश्रीकमलप्र
भाख्यः ॥२५॥ इतिश्रीकमलप्रभाचार्यविरचितेजिनपंजर
स्तोत्रसंपूर्णं ॥ ॥अथलक्ष्मीस्तोत्रलिष्यते॥ लक्ष्मीमह
स्तुल्पसतीसतीसती । प्रवृद्धकालोविरतोरतोरतो जरारुजाज
न्महताहताहता । पार्श्वंफणेरामगिरौगिरौगिरौ ॥१॥ अशेषवि
माद्यंसुमनामनामना । यत्सर्वदेसेभुविनाविनाविना । समस्त
विज्ञानमयोमयोमयो । पार्श्वंफणे० ।२। विनष्टजंतोसरणं
रणंरणं क्षिमादितोयत्कमवंमवंमवं नरामरारामक्रमंक्रमंक्र
मं पार्श्वंफणे० ।३। अज्ञानशल्कामलतालतालता यदीयश
ज्ञावनतानतानता निर्वाणसौख्यंसुगतागतागता पार्श्वंफ०

MEMORIAL

॥४॥ विवादितोशेषविधिर्विधिर्विधि बभूवसर्प्पावहरीहरी
हरी त्रिज्ञानसज्ञानहरोहरोहरो पार्श्व० ॥५॥ यद्विश्वलोकैक
गुरुंगुरुंगुरुं विराजिताजेनवरंवरंवरं तमालनीलांगभरंभ
रंभरं पार्श्व० ॥६॥ संरक्षितो दिग्भुवनंवनंवनं विराजिताये
षु दिव्यौदिव्यौदिव्यौ पादद्वये भूतसुरासुरासुरा पार्श्व० ॥७॥ ररा
ज नित्यंसकलाकलाकला ममारतृष्णोवृजिनोजिनोजिनो
संहारहृद्रूपवशनासनासनासना पार्श्वफणी० ॥८॥ तर्क्कव्या
करणेचनाटकचयेकाव्याकूलेकौशले विख्यातोभुविपद्म
नंदिमुनयस्तत्वस्पकोसंनधे गंभीरोयमकाछकंभणतिय
:संभूयसाभ्यते श्रीपद्मप्रभदेवनिर्मितमिदंस्तोत्रंजगन्म

गलं ॥९॥ इतिश्रीलक्ष्मीस्तोत्रसंपूर्णं ॥ ॥ अथसरस्वती
स्तोत्रलिष्यते ॥ शुक्लांब्रह्मविचारसारपरमामाद्यांजगद्व्या
पिनी वीणापुस्तकधारणीमभयदांजाड्यांधकारापहांहस्ते
स्फाटिकमालिकांविदधतींपद्मासनस्थां स्थितांवंदेतांपरमे
श्वरींभगवतींबुद्धिप्रदांसारदां ॥१॥ ॐह्रींह्रींह्रींमित्येकबीजे
शशिरुचिकमलेकल्पवृक्षस्यशोभे भव्येभव्यानुकूलेकुमति
वनदवेविश्ववंद्यांघ्रिपद्मे पद्मेपद्मोपविष्टेप्रणतजनमनोमो
दसंपादयित्रिप्रोत्फुल्लत्ज्ञानरूपेहरिनिजदयितेदेविसंसा
रसारे ॥२॥ ऐंरेंरेंऐंइष्टमंत्रेकमलभवसुखांभोजभूतस्वरूपे
लोकालोकप्रकाशेसकलगुणमयेनिर्गुणेनिर्विकारेतस्थू

सर० लेनैवसूक्ष्मेण्यविदितविभवेजाप्यविज्ञाततत्वे विश्वेविश्वां
२५७ तरालेसुरवरनमितेनिष्कलेनित्यशुद्धे। ॐक्लींक्लींक्लींज्ञा
प्यतुष्टेहिमरुचिमुकुटेवल्लकीव्यग्रहस्ते मातर्मातर्नमस्ते
दहदहजडतांदेहिबुद्धिंप्रसन्नां विद्येवेदांतवेद्येश्रुतिपरि
पठितेमोक्षदेमुक्तिमार्गे। मार्गातीतस्वरूपेभवममवरदेसा
रदेशुभ्रहारे।३। ॐधींधींधींधारणाख्येधृतिमतिनुतिभिर्ना
मभिःकीर्तनीयेनित्येनीतेनिमित्तेमुनिगणनमितेनूतनेवै
पुराणे।पुण्येपुण्यप्रवाहेहरिहरनमितेवर्णशुद्धेसुवर्णेमात्रे
मात्रार्थतत्वेरतिमतिगतिदेमाधवप्रीतिनादे।४। ॐह्रींह्रींह्रींस्व
स्वरूपेदहदहदुरितंपुस्तकव्यग्रहस्ते।संतुष्टाकारचित्तेस्मि

तमुखमुखसुभगेजृंभिणीस्तंभविद्ये मोहेमुग्धप्रबोधेममकुरु
कुमतिध्वांतविध्वंसमीडे। गीर्गौर्वाग्भारतित्वंकविवृषभ
रसनासिद्धिदासिद्धिसाध्या।६। स्तौमित्वांविश्ववंद्येनतुमम
रसनामाकदाचित्तजेया। मामेबुद्धिर्विरुद्धाभवतुनचमनोपा
तुमेदेविपापं। मामेदुःखंकदाचिद्विपदिपरिसमयेप्यस्तुमेना
कुलत्वं। शास्त्रेवादेकवित्वेप्रसरतुममधीर्मास्तुकुंठाकदा
चित्।।७। इत्येतत्श्लोकमुख्यैःप्रतिदिनमुषसिस्तौतियोभ
क्तिनम्रो। वाणीवाचस्पतेरप्यविदितविभवोविश्ववंद्यांघ्रि
पद्म। सस्यादिष्टार्थलाभस्सुतमिवसततंयातिसाविश्वदेवि
सौभाग्यंतस्यलोकेप्रसरतुकवितविघ्नमस्तंप्रयाती।।८।।

दशसू० ब्रह्मचारीव्रतीमौनीत्रयोदश्यांनिरामयः ॥ सारस्वतोजनः
१५० पागत्यसप्ताद्दिष्टार्थलाभवान् ॥१९॥ पक्षद्वयेपियोभक्त्यात्र
योदश्येपेकविंशति ॥ अविच्छेदंपठेद्धीमान्ध्यात्वादेवींसरस्व
ती ॥२०॥ सर्वपापविनिर्मुक्तो: सुभलोकेप्रपूजितः ॥ वांछितंफ
लमाप्नोति श्लोकेनात्रनसंसय ॥२१॥ इतिश्रीसरस्वतीस्तो
त्रसंपूर्णं ॥ ॥अथसूत्रलिख्यते ॥ त्रैकाल्यंद्रव्यषट्कंनव
पदसहितंजीवषट्कायलेश्याः पंचान्येचास्तिकायाव्रतसमि
तिगतिज्ञानचारित्रभेदाः इत्येतन्मोक्षमूलंत्रिभुवनमहि
तैः प्रोक्तमर्हद्भिरीशैः प्रत्येतिश्रद्दधातिस्पृशतिचमतिमान्
यःसवैशुद्धदृष्टिः ॥१॥ सिद्धेजयप्पसिद्धेचउविहआराहणा

फलंपत्ते ॥ वंदित्ताअरहंतेवोच्छंआराहणाकमसो ॥२॥ उज्जोव
णमुज्जवणं णिव्वाहणसाहणंचणिच्छरणंदंसणणाणचरित्तं
तवाणमाराहणाभणिया ॥३॥ ॐनमःसिद्धेभ्यः ॥ मोक्षमार्गस्य
नेतारंभेत्तारंकर्मभूभृतां ज्ञातारंविश्वतत्वानांवंदेतद्गुणल
ब्धये ॥१॥ सम्यग्दर्शनज्ञानचारित्राणिमोक्षमार्गः ॥२॥ तत्वार्थ
श्रद्धानंसम्यग्दर्शनं ॥३॥ तन्निसर्गादधिगमाद्वा ॥४॥ जीवाजीवा
स्रवबंधसंवरनिर्जरामोक्षास्तत्वं ॥५॥ नामस्थापनाद्रव्यभाव
तस्तन्न्यासः ॥६॥ प्रमाणनयैरधिगमः ॥७॥ निर्देशस्वामित्वसा
धनाधिकरणस्थितिविधानतः ॥८॥ सत्संख्याक्षेत्रस्पर्शनका
लांतरभावाल्पबहुत्वैश्च ॥९॥ मतिश्रुतावधिमनःपर्ययकेवला

दशसू०
२५१

निज्ञानं ॥१०॥ तत्प्रमाणे ॥११॥ आद्येपरोक्षं ॥१२॥ प्रत्यक्षमन्य
त् ॥१३॥ मतिःस्मृतिःसंज्ञाचिंताभिनिवोधइत्यनर्थांतरं ॥१४॥ तदिं
द्रियानिंद्रियनिमित्तं ॥१५॥ अवग्रहेहावायधारणाः ॥१६॥ व
हुवहुविधक्षिप्रानिःसृतानुक्तध्रुवाणांसेतराणां ॥१७॥ अ
र्थस्य ॥१८॥ व्यंजनस्यावग्रहः ॥१९॥ नचक्षुरनिंद्रियाभ्यां ॥२०॥ श्रु
तंमतिपूर्व्वंद्व्यनेकद्वादशभेदं ॥२१॥ भवप्रत्ययोवधिर्देवना
रकाणां ॥२२॥ क्षयोपशमनिमित्तःषड्विकल्पःशेषाणां ॥२३॥
ऋजुविपुलमतीमनःपर्य्ययः ॥२४॥ विशुद्ध्यप्रतिपाताभ्यांत
द्विशेषः ॥२५॥ विशुद्धिक्षेत्रस्वामिविषयेभ्योवधिमनःपर्यय
योः ॥२६॥ मतिश्रुतयोर्न्निवंधोद्रव्येष्वसर्व्वपर्य्यायेषु ॥२७॥ रूपि

ष्ववधेः ॥२८॥ तदनंतभागेमनःपर्य्ययस्य ॥२९॥ सर्व्वद्रव्यपर्य्याये
षुकेवलस्य ॥३०॥ एकादीनिभाज्यानियुगपदेकस्मिन्नाचतु
र्भ्यः ॥३१॥ मतिश्रुतावधयोविपर्य्ययश्च ॥३२॥ सदसतोरविशेषा
द्यदृच्छोपलब्धेरुन्मत्तवत् ॥३३॥ नैगमसंग्रहव्यवहारर्जुसू
त्रशब्दसमभिरूढैवंभूतानयाः ॥३४॥ इतितत्वार्थाधिगमेमो
क्षशास्त्रेप्रथमोध्यायः ॥१॥ औपशमिकक्षायिकौभावौमिश्र
श्चजीवस्यस्वतत्वमौदयिकपारिणामिकौच ॥१॥ द्विनवाष्टादशै
कविंशतित्रिभेदायथाक्रमं ॥२॥ सम्यक्त्वचारित्रे ॥३॥ ज्ञानदर्शन
दानलाभभोगोपभोगवीर्य्याणिच ॥४॥ ज्ञानाज्ञानदर्शनलब्ध
यश्चतुस्त्रित्रिपंचभेदाःसम्यक्त्वचारित्रसंयमासंयमाश्च ॥५॥

सू॰ ८०
१५२
गतिकषायलिंगमिथ्यादर्शनाज्ञानासंयतासिद्धलेश्या
श्चतुश्चतुस्त्र्येकैकैकैकषड्भेदाः ।६। जीवभव्याभव्यत्वानि च ।७।
उपयोगो लक्षणं ।८। स द्विविधोऽष्टचतुर्भेदः ।९। संसारिणो मुक्ता
श्च ।१०। समनस्कामनस्का ।११। संसारिणस्त्रसस्थावराः ।१२। पृ
थिव्यप्तेजोवायुवनस्पतयः स्थावराः ।१३। द्वीन्द्रियादयस्त्रसा
।१४। पंचेंद्रियाणि ।१५। द्विविधानि ।१६। निर्वृत्युपकरणे द्रव्येंद्रि
यं ।१७। लब्ध्युपयोगौ भावेंद्रियं ।१८। स्पर्शनरसनघ्राणचक्षुः
श्रोत्राणि ।१९। स्पर्शरसगंधवर्णशब्दास्तदर्थाः ।२०। श्रुतमनि
न्द्रियस्य ।२१। वनस्पत्यंतानामेकं ।२२। कृमिपिपीलिकाभ्रमर
मनुष्यादीनामेकैकवृद्धानि ।२३। संज्ञिनः समनस्काः ।२४। वि

ग्रहगतौ कर्मयोगः ।२५। अनुश्रेणि गतिः ।२६। अविग्रहा जीवस्य
।२७। विग्रहवती च संसारिणः प्राक्चतुर्भ्यः ।२८। एकसमयाऽवि
ग्रहा ।२९। एकं द्वौ त्रीन्वानाहारकः ।३०। सम्मूर्छनगर्भोपपादाज
न्म ।३१। सचित्तशीतसंवृताः सेतरा मिश्राश्चैकशस्तद्योनयः ।३२। ज
रायुजांडजपोतानां गर्भः ।३३। देवनारकाणामुपपादः ।३४। शेषा
णां सम्मूर्छनं ।३५। औदारिकवैक्रियिकाहारकतैजसकार्मणा
नि शरीराणि ।३६। परं परं सूक्ष्मं ।३७। प्रदेशतोऽसंख्येयगुणं प्रा
क् तैजसात् ।३८। अनंतगुणे परे ।३९। अप्रतीघाते ।४०। अनादि
संबंधे च ।४१। सर्वस्य ।४२। तदादीनि भाज्यानि युगपदेकस्मा
च्चतुर्भ्यः ।४३। निरुपभोगमंत्यं ।४४। गर्भसम्मूर्छनजमाद्यं ।४५। अप

MEMORIAL

स्व·द०
२५२

पादिकंवैक्रियिकं ॥४६॥ लब्धिप्रत्ययंच ॥४७॥ तैजसमपि ॥४८॥ शु
भंविशुद्धमव्याघातिचाहारकंप्रमत्तसंयतस्यैव ॥४९॥ नारकस
म्मूर्छिनोनपुंसकानि ॥५०॥ नदेवाः ॥५१॥ शेषास्त्रिवेदाः ॥५२॥ औ
पपादिकचरमोत्तमदेहासंख्येयवर्षायुषोनपवर्त्यायुषः
॥५३॥ इतितत्त्वार्थाधिगमेमोक्षशास्त्रेद्वितीयोध्यायः ॥२॥
रत्नशर्करावालुकापंकधूमतमोमहातमःप्रभाभूमयोघनां
बुवाताकाशप्रतिष्ठाःसप्ताधोधः ॥१॥ तासुत्रिंशत्पंचविंशतिपंच
दशदशत्रिपंचोनैकनरकशतसहस्राणिपंचचैवयथाक्रमं
॥२॥ नारकानित्याशुभतरलेश्यापरिणामदेहवेदनाविक्रिया
ः ॥३॥ परस्परोदीरितदुःखाः ॥४॥ संक्लिष्टासुरोदीरितदुःखाश्च

प्राक्चतुर्थ्याः ॥५॥ तेष्वेकत्रिसप्तदशद्वाविंशतित्रयस्त्रिंशत्साग
रोपमासत्त्वानांपरास्थितिः ॥६॥ जंबूद्वीपलवणोदादयःशुभ
नामानोद्वीपसमुद्राः ॥७॥ द्विर्द्विर्विष्कंभाःपूर्वपूर्वपरिक्षेपिणो
वलयाकृतयः ॥८॥ तन्मध्येमेरुनाभिर्वृत्तोयोजनशतसहस्र
विष्कंभोजंबूद्वीपः ॥९॥ भरतहैमवतहरिविदेहरम्यकहैरण्य
वतैरावतवर्षाःक्षेत्राणि ॥१०॥ तद्विभाजिनःपूर्वापरायताहिमव
न्महाहिमवन्निषधनीलरुक्मिशिखरिणोवर्षधरपर्वताः ॥११॥
हेमार्जुनतपनीयवैडूर्यरजतहेममयाः ॥१२॥ मणिविचित्रपार्श्वा
उपरिमूलेचतुल्यविस्ताराः ॥१३॥ पद्ममहापद्मतिगिंछकेसरि
महापुंडरीकपुंडरीकाह्रदास्तेषामुपरि ॥१४॥ प्रथमोयोजनस

स्व०२०
१५४

ह्रसायामस्तदर्धविष्कंभोह्रदः ॥१५॥ दशयोजनावगाहः ॥१६॥
तन्मध्येयोजनंपुष्करं ॥१७॥ तद्द्विगुणद्विगुणाह्रदाः पुष्करा
णिच ॥१८॥ तन्निवासिन्योदेव्यः श्रीह्रींधृतिकीर्तिबुद्धिलक्ष्म्य
ः पल्योपमस्थितयः ससामानिकपरिषत्काः ॥१९॥ गंगासिंधु
रोहिद्रोहितास्याहरिद्धरिकांता शीताशीतोदानारीनरकां
तासुवर्णरूप्यकूलारक्तारक्तोदासरितस्तन्मध्यगाः ॥२०॥ द्व
योर्द्वयोः पूर्वाः पूर्वगाः ॥२१॥ शेषास्त्वपरगाः ॥२२॥ चतुर्दशनदी
सहस्रपरिवृतागंगासिंध्वादयोनद्यः ॥२३॥ भरतःषड्विंशति
पंचयोजनशतविस्तारःषट्चैकोनविंशतिभागायोजन
स्य ॥२४॥ तद्द्विगुणद्विगुणविस्तारा ॥२५॥ वर्षधरवर्षाविदेहांता

॥२६॥ उत्तरादक्षिणतुल्याः ॥२७॥ भरतैरावतयोर्वृद्धिह्रासौषट्
समयाभ्यामुत्सर्पिणीभ्यां ॥२८॥ ताभ्यामपराभूमयोवस्थिता ॥२९॥
एकद्वित्रिपल्योपमस्थितयोहैमवतकहारिवर्षकदैवकु
रवकाः ॥३०॥ तथोत्तराः ॥३१॥ विदेहेषुसंख्येयकालाः ॥३२॥ भरत
स्यविष्कंभोजंबूद्वीपस्यनवतिशतभागः ॥३३॥ द्विर्धातकीखंडे
॥३४॥ पुष्करार्द्धेच ॥३५॥ प्राग्मानुषोत्तरान्मनुष्याः ॥३६॥ आर्याम्ले
च्छाश्च ॥३७॥ भरतैरावतविदेहाःकर्मभूमयोन्यत्रदेवकुरूत्तर
कुरुभ्यः ॥३८॥ नृस्थितीपरावरेत्रिपल्योपमांतर्मुहूर्ते ॥३९॥ ति
र्यग्योनिजानांच ॥४०॥ इतितत्वार्थाधिगमेमोक्षशास्त्रेतृती
योध्यायः ॥३॥ देवाश्चतुर्निकायाः ॥१॥ आदितस्त्रिषुपीतांत

सू०द० लेश्याः ।२। दशाष्टपंचद्वादशविकल्पाः कल्पोपपन्नपर्यं
१५५ ताः ।३। इंद्रसामानिकत्रायत्रिंशत्पारिषदात्मरक्षलोकपाला
नीकप्रकीर्णकाभियोग्यकिल्विषिकाश्चैकशः ।४। त्रायस्त्रिं
शल्लोकपालवर्ज्याव्यंतरज्योतिष्काः ।५। पूर्वयोर्द्वींद्राः ।६।
कायप्रवीचारा आ ऐशानात् ।७। शेषाः स्पर्शरूपशब्दमनःप्र
वीचाराः ।८। परेऽप्रवीचाराः ।९। भवनवासिनोऽसुरनागविद्युत्सु
पर्णाग्निवातस्तनितोदधिद्वीपदिक्कुमाराः ।१०। व्यंतराः किं
नरकिंपुरुषमहोरगगंधर्वयक्षराक्षसभूतपिशाचाः ।११। ज्यो
तिष्काः सूर्याचंद्रमसौग्रहनक्षत्रप्रकीर्णकतारकाश्च ।१२।
मेरुप्रदक्षिणानित्यगतयोनृलोके ।१३। तत्कृतः कालवि

भागः ।१४। बहिरवस्थिताः ।१५। वैमानिकाः । कल्पोपपन्नाः ।१६।
कल्पातीताश्च ।१७। उपर्युपरि ।१८। सौधर्मैशानसनत्कुमारमाहें
द्रब्रह्मब्रह्मोत्तरलांतवकापिष्टशुक्रमहाशुक्रशतारसहस्रा
रेष्वानतप्राणतयोरारणाच्युतयोर्नवसुग्रैवेयकेषुविज
यवैजयंतजयंतापराजितेषुसर्वार्थसिद्धौच ।१९। स्थितिप्रभा
वसुखद्युतिलेश्याविशुद्धींद्रियावधिविषयतोऽधिकाः ।२०।
गतिशरीरपरिग्रहाभिमानतोहीनाः ।२१। पीतपद्मशुक्लले
श्याद्वित्रिशेषेषु ।२२। प्राग्ग्रैवेयकेभ्यः कल्पाः ।२३। ब्रह्मलोका
लयालौकांतिकाः ।२४। सारस्वतादित्यवह्न्यरुणगर्दतोयतु
षिताव्याबाधारिष्टाश्च ।२५। विजयादिषुद्विचरमाः ।२६। अपपा

मू॰ द॰
२५६

दिकमनुष्येभ्यः शेषास्तिर्यग्योनयः ॥२७॥ स्थितिरसुरनागसुप
र्णद्वीपशेषाणां सागरोपमत्रिपल्योपमार्द्धहीनमिताः ॥२८॥
सौधर्मैशानयोः सागरोपमे अधिके ॥२९॥ सनत्कुमारमाहें
द्रयोः सप्त ॥३०॥ त्रिसप्तनवैकादशत्रयोदशभिरधिकानि तु ॥३१॥
आरणाच्युतादूर्द्ध्वमेकैकेन नवसु ग्रैवेयकेषु विजयादि
षु सर्वार्थसिद्धौ च ॥३२॥ अपरापल्योपममधिकं ॥३३॥ परतः पर
तः पूर्वापूर्वानंतरा ॥३४॥ नारकाणां च ॥३५॥ द्वितीयादिषु ॥३६॥ दश
वर्षसहस्राणि प्रथमायां ॥३७॥ भुवनेषु च ॥३८॥ व्यंतराणां च ॥३९॥ प
रापल्योपममधिकं ॥४०॥ ज्योतिष्काणां च ॥४१॥ तदष्टभागोपरा
॥४२॥ इति तत्वार्थाधिगमे मोक्षशास्त्रे चतुर्थोऽध्यायः ॥४॥

अजीवकाया धर्माधर्माकाशपुद्गलाः ॥१॥ द्रव्याणि ॥२॥ जीवा
श्च ॥३॥ नित्यावस्थितान्यरूपाणि ॥४॥ रूपिणः पुद्गलाः ॥५॥ आ
आकाशादेकद्रव्याणि ॥६॥ निःक्रियाणि च ॥७॥ असंख्येयाः प्र
देशा धर्माधर्मैकजीवानां ॥८॥ आकाशस्यानंताः ॥९॥ संख्ये
यासंख्येयाश्च पुद्गलानां ॥१०॥ नाणोः ॥११॥ लोकाकाशेऽवगाहः
॥१२॥ धर्माधर्मयोः कृत्स्ने ॥१३॥ एकप्रदेशादिषु भाज्यः पुद्गला
नां ॥१४॥ असंख्येयभागादिषु जीवानां ॥१५॥ प्रदेशसंहारविसर्पा
भ्यां प्रदीपवत् ॥१६॥ गतिस्थित्युपग्रहौ धर्माधर्मयोरुपकारः ॥१७॥
आकाशस्यावगाहः ॥१८॥ शरीरवाङ्मनःप्राणापानाः पुद्गला
नां ॥१९॥ सुखदुःखजीवितमरणोपग्रहाश्च ॥२०॥ परस्परोपग्रहो

स्व०
२५७

जीवानां ।२१। वर्त्तनापरिणामक्रियापरत्वापरत्वे च कालस्य
।२२। स्पर्शरसगंधवर्णवंतः पुद्गलाः ।२३। शब्दबंधसौक्ष्म्यस्थौ
ल्यसंस्थानभेदतमश्छायातपोद्योतवंतश्च ।२४। अणवः स्कं
धाश्च ।२५। भेदसंघातेभ्य उत्पद्यंते ।२६। भेदादणुः ।२७। भेदसंघा
ताभ्यां चाक्षुषः सद्द्रव्यलक्षणं ।२८। उत्पादव्ययध्रौव्ययुक्तं
सत् ।२९। तद्भावाव्ययं नित्यं ।३०। अर्पितानर्पितसिद्धेः ।३०।
स्निग्धरूक्षत्वाद्बंधः ।३२। न जघन्यगुणानां ।३३। गुणसाम्ये सदृ
शानां ।३४। द्व्यधिकादिगुणानां तु ।३५। बंधेऽधिकौ पारिणामि
कौ च ।३६। गुणपर्य्यायवद्द्रव्यं ।३७। कालश्च ।३८। सोऽनंतसमयः
।३९। द्रव्याश्रया निर्गुणा गुणाः ।४०। तद्भावः परिणामः ।४१। इ

ति तत्वार्थाधिगमे मोक्षशास्त्रे पंचमोऽध्यायः ।५। कायवाङ्म
नः कर्म योगः ।१। स आस्रवः ।२। शुभः पुण्यस्याशुभः पापस्य ।३।
सकषायकषाययोः सांपरायिकेर्यापथयोः ।४। इंद्रियकषाया
व्रतक्रियाः पंचचतुःपंचपंचविंशतिसंख्याः पूर्वस्य भेदाः ।५। तीव्र
मंदज्ञाताज्ञातभावाधिकरणवीर्यविशेषेभ्यस्तद्विशेषः ।६। अ
धिकरणं जीवाजीवाः ।७। आद्यं संरंभसमारंभारंभयोगकृतका
रितानुमतकषायविशेषैस्त्रिस्त्रिस्त्रिश्चतुश्चैकशः ।८। निर्वर्त्त
नानिक्षेपसंयोगनिसर्गा द्विचतुर्द्वित्रिभेदाः परं ।९। तत्प्रदो
षनिह्नवः मात्सर्य्यांतरायासादनोपघाता ज्ञानदर्शनाव
रणयोः ।१०। दुःखशोकतापाक्रंदनवधपरिदेवनान्यात्मपरो

DR BHAU DAJI

द·सू·
२५८

नयसत्त्वान्पसंद्वेद्यस्य ॥११॥ केवलिश्रुतसंघधर्म्मदेवावर्णवादो
दर्शनमोहस्य ॥१२॥ कषायोदयात्तीव्रपरिणामश्चारित्रमोहस्य
॥१३॥ बह्वारंभपरिग्रहत्वं नारकस्यायुषः ॥१४॥ मायातैर्यग्योना-
स्य ॥१५॥ स्वभावमार्द्दवं च अल्पारंभपरिग्रहत्वं मानुषस्य ॥१६॥ नि-
शीलव्रतत्वं सर्वेषां ॥१७॥ सरागसंयमसंयमाकामनिर्ज्जरा बाल-
तपांसि दैवस्य ॥१८॥ सम्यक्त्वं च ॥१९॥ योगवक्रता विसंवादनं चाशु-
भस्य नाम्नः ॥२०॥ तद्विपरीतं शुभस्य ॥२१॥ दर्शनविशुद्धिर्विनय
संपन्नता शीलव्रतेष्वनतिचारो ऽभीक्ष्णज्ञानोपयोगसंवेगौ
शक्तितस्त्यागतपसी साधुसमाधिर्वैयावृत्यकरणमर्हदाचार्य
बहुश्रुतप्रवचनभक्तिरावश्यकापरिहाणिर्मार्गप्रभावना

प्रवचनवात्सल्यत्वमिति तीर्थंकरत्वस्य ॥२२॥ परात्मनिंदाप्र-
शंसे सदसद्गुणोच्छादनोद्भावने च नीचैर्गोत्रस्य ॥२३॥ तद्विपर्ययो नी-
चैर्वृत्त्यनुत्सेकौ चोत्तरस्य ॥२४॥ विघ्नकरणमंतरायस्य ॥२५॥६
इति तत्त्वार्थाधिगमे मोक्षशास्त्रे षष्ठोऽध्यायः ॥६॥ हिंसानृ-
तस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतं ॥१॥ देशसर्वतोऽणुमहती
॥२॥ तत्स्थैर्यार्थं भावनाः पंच पंच ॥३॥ वाग्मनोगुप्तीर्यादाननिक्षे-
पणसमित्यालोकितपानभोजनानि पंच ॥४॥ क्रोधलोभभी-
रुत्वहास्यप्रत्याख्यानान्यनुवीचिभाषणं च पंच ॥५॥ शून्यागार-
विमोचितावासपरोपरोधाकरणभैक्ष्यशुद्धिसधर्म्माविसंवादाः
पंच ॥६॥ स्त्रीरागकथाश्रवणतन्मनोहरांगनिरीक्षणपूर्वरता-

स्व·द·
२५७

नुस्मरणवृष्येष्टरसस्वशरीरसंस्कारत्यागाः पंच ॥७॥ मनोज्ञा
मनोज्ञेंद्रियविषयरागद्वेषवर्ज्जनानि पंच ॥८॥ हिंसादिष्विह
हामुत्रापायावद्यदर्शनं ॥९॥ दुःखमेव वा ॥१०॥ मैत्रीप्रमोदकारु
ण्यमाध्यस्थानि च सत्वगुणाधिकक्लिश्यमानाविनयेषु ।
॥११॥ जगत्कायस्वभावौ वा संवेगवैराग्यार्थं ॥१२॥ प्रमत्तयोगात्प्राण
व्यपरोपणं हिंसा ॥१३॥ असदभिधानमनृतं ॥१४॥ अदत्तादानं
स्तेयं ॥१५॥ मैथुनमब्रह्म ॥१६॥ मूर्छापरिग्रहः ॥१७॥ निःशल्यो व्रती
॥१८॥ अगार्यनगारश्च ॥१९॥ अणुव्रतोगारी ॥२०॥ दिग्देशानर्थदं
डविरतिसामायिकप्रोषधोपवासोपभोगपरिभोगपरिमा
णातिथिसंविभागव्रतसंपन्नश्च ॥२१॥ मारणांतिकिंसंलेषना

जोषिता ॥२२॥ शंकाकांक्षाविचिकित्सान्यदृष्टिप्रशंसासंस्तवाः स
म्यग्दृष्टेरतीचाराः ॥२३॥ व्रतशीलेषु पंच पंच यथाक्रमं ॥२४॥ बंधवध
छेदातिभारारोपणान्नपाननिरोधाः ॥२५॥ मिथ्योपदेशरहोभ्याख्या
नकूटलेखक्रियान्यासापहारसाकारमंत्रभेदाः ॥२६॥ स्तेनप्रयो
गस्तदाहृतादानविरुद्धराज्यातिक्रमहीनाधिकमानोन्मानप्र
तिरूपकव्यवहाराः ॥२७॥ परविवाहकरणेत्वरिकापरिग्रहीताग
मनानंगक्रीडाकामतीव्राभिनिवेशाः ॥२८॥ क्षेत्रवास्तुहिरण्यसुव
र्णधनधान्यदासीदासकुप्यप्रमाणातिक्रमाः ॥२९॥ ऊर्ध्वाधस्तिर्य
ग्व्यतिक्रमाः क्षेत्रवृद्धिस्मृत्यंतराधानानि ॥३०॥ आनयनप्रेष्यप्र
योगशब्दरूपानुपातपुद्गलक्षेपाः ॥३१॥ कंदर्प्पकौत्कुच्यमौख

स॰ २६०

र्यासमीक्ष्याधिकरणोपभोगपरिभोगानर्थक्यानि ॥३२॥ योग
दुःप्रणिधानानादरस्मृत्यनुपस्थानानि ॥३३॥ अप्रत्यवेक्षि
ताप्रमार्जितोत्सर्गादानसंस्तरोपक्रमणानादरस्मृत्यनुपा
स्थानानि ॥३४॥ सचित्तसंबंधसन्मिश्राभिषवदुःपक्वाहारा
: ॥३५॥ सचित्तनिक्षेपापिधानपरव्यपदेशमात्सर्यकालातिक्र
माः ॥३६॥ जीवितमरणाशंसामित्रानुरागसुखानुबंधनिदाना
नि ॥३७॥ अनुग्रहार्थं स्वस्यातिसर्गो दानं ॥३८॥ विधिद्रव्यदातृ
पात्रविशेषात्तद्विशेषः ॥३९॥ इति तत्त्वार्थाधिगमे मोक्ष
शास्त्रे सप्तमोऽध्यायः ॥७॥ मिथ्यादर्शनाविरतिप्रमादकषा
ययोगा बंधहेतवः ॥१॥ सकषायत्वाज्जीवः कर्मणो योग्यान्

पुद्गलानादत्ते स बंधः ॥२॥ प्रकृतिस्थित्यनुभागप्रदेशास्तद्विधयः
॥३॥ आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नाम
गोत्रांतरायाः ॥४॥ पंचनवद्व्यष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपंच
भेदा यथाक्रमं ॥५॥ मतिश्रुतावधिमनःपर्ययकेवलानां ॥६॥
चक्षुरचक्षुरवधिकेवलानां निद्रानिद्रानिद्राप्रचलाप्रचला
स्त्यानगृद्धयश्च ॥७॥ सदसद्वेद्ये ॥८॥ दर्शनचारित्रमोहनीया
कषायवेदनीयाख्यास्त्रिद्विनवषोडशभेदाः सम्यक्त्वमिथ्या
त्वतदुभयान्यकषायकषायौ हास्यरत्यरतिशोकभय
जुगुप्सास्त्रीपुंनपुंसकवेदाः अनंतानुबंधिप्रत्याख्यानप्र
त्याख्यानसंज्वलनविकल्पाश्चैकशः क्रोधमानमायालोभाः

सू·द०
२६१

॥९॥ नारकतैर्यग्योनिमानुषदैवानि ॥१०॥ गतिजातिशरीरां
गोपांगनिर्माणबंधनसंघातसंस्थानसंहननस्पर्शरसगं
धवर्णानुपूर्व्यागुरुलघूपघातपरघातातपोद्योतोछ्वासवि
हायोगतयः प्रत्येकशरीरत्रससुभगसुस्वरशुभसूक्ष्मपर्या
प्तस्थिरादेययशःकीर्त्तिसेतराणितीर्थकरत्वंच ॥११॥ उच्चैर्नी
चैश्च ॥१२॥ दानलाभभोगोपभोगवीर्याणां ॥१३॥ आदितस्तिसृणा
मंतरायस्यच त्रिंशत्सागरोपमकोटीकोट्यः परास्थिति ॥१४॥
सप्ततिर्मोहनीयस्य ॥१५॥ विंशतिर्नामगोत्रयोस्त्रयःस्त्रिंशत्साग
रोपमान्यायुषः ॥१६॥ अपराद्वादशमुहूर्त्तावेदनीयस्य ॥१७॥ ना
मगोत्रयोरष्टौ ॥१८॥ शेषाणामंतर्मुहूर्त्ता ॥१९॥ विपाकोनुभवः ॥२०॥

सयथानाम ॥२१॥ ततश्च निर्जरा ॥२२॥ नामप्रत्ययाः सर्वतोयो
गविशेषात्सूक्ष्मैकक्षेत्रावगाढस्थिताः सर्वात्मप्रदेशेष्वनंत
ानंतप्रदेशाः ॥२३॥ सद्वेद्यशुभायुर्नामगोत्राणिपुण्यं ॥२४॥ अतो
न्यत्पापं ॥२५॥ इतितत्वार्थाधिगमेप्रोक्तशास्त्रेअष्टमोध्या
यः ॥८॥ आश्रवनिरोधसंवरः ॥१॥ सगुप्तिसमितिधर्मानुप्रेक्षा
परीषहजयचारित्रैः ॥२॥ तपसानिर्जराच ॥३॥ सम्यग्योगनिग्र
होगुप्ति ॥४॥ ईर्याभाषैषणादाननिक्षेपोत्सर्गासमितयः ॥५॥ उ
त्तमक्षमामार्द्दवआर्जवसत्यशौचसंजमतपस्त्यागाऽकिंच
न्यब्रह्मचर्याणिधर्मः ॥६॥ अनित्याशरणसंसारैकत्वान्यत्वा
शुच्याश्रवसंवरनिर्जरालोकबोधिदुर्लभधर्मस्वाख्याततत्वा

नुचिंतनमानुप्रेक्षा ॥७॥ मार्गाच्यवननिर्जरार्थं परिषोढव्याप
रीषहा ॥८॥ क्षुत्पिपासाशीतोष्णदंशमशकनाग्न्यारतिस्त्रीचर्
र्यानिषद्याशय्याक्रोशवधयाञ्चालाभरोगतृणस्पर्शमल
सत्कारपुरस्कारप्रज्ञाज्ञानादर्शनानि ॥९॥ सूक्ष्मसांपरायछ
द्मस्थवीतरागयोश्चतुर्दश ॥१०॥ एकादश जिने बादरसांपराये
सर्वे ॥११॥ ज्ञानावरणे प्रज्ञाज्ञाने ॥१२॥ दर्शनमोहांतराययोर्दर्श
नालाभौ ॥१३॥ चारित्रमोहे नाग्न्यारतिस्त्रीनिषद्याक्रोशयाच्ञा
सत्कारपुरस्काराः ॥१४॥ वेदनीये शेषाः ॥१५॥ एकादयो भाज्या यु
गपदेकस्मिन्नेकोनविंशतिः ॥१६॥ सामायिकछेदोपस्थापना
परिहारविशुद्धिसूक्ष्मसांपराययथाख्यातमिति चारित्रं ॥१७॥

अनसनअवमोदर्यवृत्तिपरिसंख्यारसपरित्यागविविक्तशय्या
शनकायक्लेसा बाह्यं तपः ॥१८॥ प्रायश्चित्तविनयवैयावृत्यस्वा
ध्यायव्युत्सर्गध्यानान्युत्तरः ॥१९॥ नवचतुर्दशपंचद्विभेदा यथा
क्रमं प्राग्ध्यानात् ॥२०॥ आलोचनप्रतिक्रमणतदुभयविवेक
व्युत्सर्गतपश्छेदपरिहारोपस्थापनाः ॥२१॥ ज्ञानदर्शनचारित्रो
पचाराः ॥२२॥ आचार्योपाध्यायतपस्विशैक्षग्लानगणकुलसंघ
साधुमनोज्ञानां ॥२३॥ वाचनापृच्छनानुप्रेक्षाम्नायधर्मोपदेशाः
॥२४॥ बाह्याभ्यंतरोपध्योः ॥२५॥ उत्तमसंहननस्यैकाग्रचिंतानिरो
धो ध्यानमांतर्मुहूर्तात् ॥२६॥ आर्तरौद्रधर्म्यशुक्लानि ॥२७॥ परे मो
क्षहेतू ॥२८॥ आर्तमनोज्ञस्य संप्रयोगे तद्विप्रयोगाय स्मृतिस

Dr. BHAU DAJI

५० मन्वाहारः।२९। विपरीतंमनोज्ञस्य।३०। वेदनीयाश्च।३१। निदानं
१६३ च।३२। तदविरतिदेशविरतप्रमत्तसंयतानां।३३। हिंसानृतस्ते
यविषयसंरक्षणेभ्योरौद्रमविरतदेशविरतयोः।३४। आज्ञापा
यविपाकसंस्थानविचयायधर्म्मं।३५। शुक्लेचाद्येपूर्वविदः।३६
परेकेवलिनः।३७। पृथक्त्वैकत्ववितर्कसूक्ष्मक्रियाप्रतिपातिव्युप
रतक्रियानिवर्त्तीनि।३८। त्र्येकयोगकाययोगायोगानां।३९। एका
श्रयेसवितर्कविचारेपूर्वे।४०। अवीचारंद्वितीयं।४१। वितर्कःश्रु
तं।४२। वीचारोर्थव्यंजनयोगसंक्रांतिः।४३। सम्यग्दृष्टिश्रावक
विरतानंतवियोजकदर्शनमोहक्षपकक्षीणमोहजिनाः क्र
मशोसंख्येयगुणनिर्जराः।४४। पुलाकवकुशकुशीलनिर्ग्रं

थास्नातकानिर्ग्रंथास्नातका।४६। संयमश्रुतप्रतिसेवनाती
र्थलिंगलेश्योपपादस्थानविकल्पतःसाध्याः।।४७।।इतित
त्वार्थाधिगमेमोक्षशास्त्रेनवमोध्यायः।।९।। मोहक्षयात्ज्ञा
नदर्शनावरणांतरायक्षयाच्चकेवलं।१। वंधहेत्वभावनिर्जराभ्यां
कृत्स्नकर्मविप्रमोक्षोमोक्षः।२। औपशमिकादिभव्यत्वानांच
।३। अन्यत्रकेवलसम्यक्त्वज्ञानदर्शनसिद्धत्वेभ्यः।४। तदनंत
रमूर्ध्वंगच्छत्यालोकांतात्।५। पूर्वप्रयोगात्संगत्वाद्बंधच्छेदात्त
थागतिपरिणामाच्च।६। आविद्धकुलालचक्रवद्व्यपगतले
पालांवुवदेरंडवीजवदग्निशिखावच्च।७। धर्म्मास्तिकायाभा
वात्।८। क्षेत्रकालगतिलिंगतीर्थचारित्रप्रत्येकवुद्धवोधितज्ञा

सू.द०
२६४

नावगाह ॥९॥ नांतरसंख्याल्पबहुत्वतःसाध्याः ॥१०॥ इतितत्त्वा
र्थाधिगमेमोक्षशास्त्रेदशमोध्यायः ॥१०॥ अक्षरमात्रपद
स्वरहीनं व्यंजनसंधिविवर्जितरेफं साधुभिरत्रममक्षमितं
व्यं कोनविमुह्यतिशास्त्रसमुद्रे ॥१॥ दशाध्यायेपरिछिन्ने
तत्वार्थेपठितेसति फलंस्यादुपवासस्य भाषितंमुनिपुंगवैः
तत्वार्थसूत्रकर्त्तारंगृध्रपिछोपलक्षितं वंदेगणींद्रसंजात
मुमास्वामिमुनीश्वरं ॥२॥ जंसक्कइ तंकीरइ जंचणसक्केइ तंजि
सद्दहइ सद्दहमाणोजीवोपावेइअजरामरंठाणं ॥३॥ तवय
रणंवयधरणं संजमसरणंचजीवदयाकरणं अंतेसमाहिम
रणं चउगइदुक्खंनिवारेइ ॥४॥ इतिश्रीदशसूत्रसंपूर्णः ॥१॥

॥अथसहस्रनामहफलिष्यते॥ प्रभोभवांगभोगेषु निर्वि
ण्णोदुःखभीरुकः एषविज्ञापयामित्वांशरण्यंकरुणार्णवं
॥१॥ सुखलालसयामोहाद्भ्राम्यनबहिरितस्ततः सुखैकहेतो
र्नामापितवनज्ञातवानपुरा ॥२॥ अद्यमोहग्रहावेशशैथि
ल्यात्किंचिदुन्मुखः अनंतगुणमाप्तेभ्य स्त्वांश्रुत्वास्तोतुमु
द्यतः ॥३॥ भक्त्याप्रोत्साह्यमानोपिदूरंशक्त्यातिरस्कृतः त्वांना
माष्टकसहस्रेणस्तुत्वात्मानंपुनाम्यहं ॥४॥ जिनसर्वज्ञयज्ञा
र्हतीर्थकृन्नाथयोगिनां निर्वाणब्रह्मबुद्ध्यंतकृतांचाष्टोत्त
रैःशतैः ॥५॥ तद्यथा जिनोजिनेशोजिनराट्जिनपृष्ठोजि
नोत्तमः जिनाधिपोजिनाधीशोजिनस्वामीजिनेश्वरः ॥६॥

सह० २६५ जिननाथो जिनपति र्जिनराजो जिनाधिराट् । जिनप्रभु
र्जिनविभु र्जिनभर्त्ता जिनाधिभूः ॥७॥ जिननेता जिनेशानो
जिनेनो जिननायकः जिनेट् जिनपरिवृढो जिनदेवो जि
नेशिता ॥८॥ जिनाधिराजो जिनपो जिनेशी जिनशासिता
जिनाधिनाथो ऽपि जिनाधिपति र्जिनपालकः ॥९॥ जिनचंद्रो
जिनादित्यो जिनार्को जिनकुंजरः जिनेंदु र्जिनधौरेयो जि
नधुर्यो जिनोत्तरः ॥१०॥ जिनवर्य्यो जिनवरो जिनसिंहो जिनो
द्वहः जिनर्षभो जिनवृषो जिनरत्नं जिनोरसं ॥११॥ जिनेशो
जिनशार्दूलो जिनाग्र्यं जिनपुंगवः जिनहंसो जिनोत्तंसो
जिननागो जिनाग्रणी ॥१२॥ जिनप्रवेकश्च जिनग्रामणी र्जि

नसत्तमः जिनप्रवर्हः परमजिनो जिनपुरोगमः ॥१३॥ जिनश्रे
ष्ठो जिनज्येष्ठो जिनमुख्यो जिनाग्रिमः श्रीजिनश्चोत्तमजि
नो जिनवृंदारको ऽरिजित् ॥१५॥ निर्विघ्नो विरजाः शुद्धो निस्तम
स्को निरंजनः घातिकर्म्मांतकः कर्म्ममर्म्मावित्कर्म्महानघः
वीतरागो ऽक्षुद् द्वेषो निर्म्मोहो निर्म्मदो ऽगदः वितृष्णो निर्म्ममो
ऽसंगो निर्भयो वीतविस्मयः ॥१६॥ अस्वप्नो निःश्रमो ऽजन्मा निःस्वे
दो निर्जरो ऽमरः अरत्यतीतो निश्चिंतो निर्विषादस्त्रिषष्टिजित्
॥१७॥ इति जिनशतं ॥ सर्वज्ञः सर्ववित्सर्वदर्शी सर्वावलोकनः
अनंतविक्रमो ऽनंतवीर्य्यो ऽनंतसुखात्मकः ॥१८॥ अनंतसौख्यो
विश्वज्ञो विश्वदृश्वा ऽखिलार्थदृक् न्यक्षदृक् विश्वतश्चक्षु ।

र्विश्वचक्षुरशेषवित् ।१९। आनंदःपरमानंदःसदानंदःस
दोदयःनित्यानंदोमहानंदःपरानंदःपरोदयः।२०।परमोजः
परंतेजःपरंधामपरंमहःप्रत्यग्ज्योतिःपरंज्योतिःपरब्रह्म
परंरहः।२१।प्रत्यगात्माप्रबुद्धात्मामहात्मात्ममहोदयःपरमा
त्माप्रशांतात्मापरमात्मात्मनिकेतनः।२२।परमेष्टीमहिष्टा
त्माश्रेष्ठात्मास्वात्मनिष्ठितःब्रह्मनिष्ठोमहानिष्ठोनिरूढा
त्मादृढात्मदृक्।२३।एकविद्योमहाविद्योमहाब्रह्मपदेश्व
रःपंचब्रह्ममयःसार्वःसर्वविद्येश्वरःस्वभूः।२४।अनंतधी
रनंतात्मानंतशक्तिरनंतदृक्अनंतानंतधीशक्तिरनंतचि
दनंतमुत्।२५।सदाप्रकाशःसर्वार्थसाक्षात्कारीसमग्रधीःक

र्मसाक्षीजगच्चक्षुरलक्ष्यात्माचलस्थितिः।२६।निराबाधोप्र
तर्क्यात्माधर्मचक्रीविदांवरःभूतात्मासहजज्योतिर्विश्वज्यो
तिरतींद्रियः।२७।केवलीकेवलालोकोलोकालोकविलोक
नःविविक्तःकेवलोऽव्यक्तःशरण्योऽचिंत्यवैभवः।२८।विश्वभृद्वि
श्वरूपात्माविश्वात्माविश्वतोमुखःविश्वव्यापीस्वयंज्योति
रचित्यात्मामलःप्रभः।२९।महौदार्योमहाबोधिर्महालाभोम
होदयःमहोपभोगःसुगतिर्महाभोगोमहाबलः॥३०॥इतिम
[illegible]शतं॥यज्ञार्हो भगवानर्हन्महार्होमघवार्चितःभूतार्थ
यज्ञपुरुषोभूतार्थक्रतुपौरुषः।३१।पूज्योभट्टारकस्तत्रभवा
नत्रभवान्महान्महामहार्हस्तत्रायुस्ततोदीर्घायुरर्घ्यवा

सह० क्त ॥१॥ आराध्यः परमाराध्यः पंचकल्याणपूजितः दृग्विशु
६७ द्धिगणोदग्रो वसुधारार्चितास्पदः ॥२॥ सुस्वप्नदर्शी दिव्यौजाः
शचीसेवितमातृकः स्याद्रत्नगर्भः श्रीपूतगर्भो गर्भोत्सवोच्छ्रि
तः ॥३॥ दिव्योपचारोपचितः पद्मभूर्निष्कलः स्वजः सर्वीयज
न्मा पुण्यांगो भास्वानुद्भूतदैवतः ॥४॥ विश्वविज्ञातसंभूतिर्वि
श्वदेवागमाद्भुतः शचीसृष्टप्रतिच्छंदः सहस्राक्षदृगुत्सवः ॥५॥
नृत्यदैरावतासीनः सर्वशक्रनमस्कृतः हर्षाकुलामरखग
श्चारणर्षिमतोत्सवः ॥६॥ व्योमविष्णुपदारत्नस्नानपीठायितां
घ्रिराट् तीर्थेशमन्यदुग्धाब्धिः स्नानांबुस्नातवासवः ॥७॥ गंधां
बुपूतत्रैलोक्यो वज्रसूचीशुचिश्रवाः कृतार्थितशचीहस्तः

शक्रोद्घुष्टनामकः ॥८॥ शक्रारब्धानंदनृत्यः शचीविस्मापितां
बिकः इंद्रनृत्यंतपितृको रैदपूर्णमनोरथः ॥९॥ आज्ञार्थींद्रकृ
तोसेवो देवर्षीष्टशिवोद्यमः दीक्षाक्षणक्षुभ्यज्जगद्भूर्भुवःस्वः
पतीडितः ॥१०॥ कुबेरनिर्मितास्थानः श्रीयुग्योगीश्वरार्चितः
ब्रह्मेड्यो ब्रह्मविद्वेद्यो याज्यो यज्ञपतिः क्रतुः ॥११॥ यज्ञांगममृ
तंयज्ञो हविः स्तुत्यः स्तुतीश्वरः भावो महामहपतिर्महायज्ञो
ग्रयाजकः ॥१२॥ दयायागो जगत्पूज्यः पूजार्हो जगदर्चितः देवा
धिदेवः शक्रार्च्यो देवदेवो जगद्गुरुः ॥१३॥ संहूतदेवसंघार्च्यः प
द्मयानो जयध्वजी भामंडली चतुःषष्टिचामरो देवदुंदुभिः ॥१४॥
वागस्पृष्टासनश्छत्रत्रयराट् पुष्पवृष्टिभाक् दिव्याशोको मान

DR BHAU DAJI MEMORIAL

सह०
९८

मर्हीसंगीतार्होष्टमंगलं ॥२५॥ इतियज्ञार्हशतं ॥ तीर्थकृत्ती
र्थसृत्तीर्थकरस्तीर्थंकरः सुदृक् । तीर्थकर्त्तातीर्थभर्त्तातीर्थेश
स्तीर्थनायकः ॥२॥ धर्मतीर्थकरस्तीर्थप्रणेतातीर्थकारकः
तीर्थप्रवर्त्तकस्तीर्थवेधास्तीर्थविधायकः ॥२॥ सत्यतीर्थकर
स्तीर्थसेव्यस्तीर्थिकतारकः । सत्यवाक्याधिपः सत्यशासनोप्र
तिशासनः ॥३॥ स्याद्वादीदिव्यगीर्दिव्यध्वनिरव्याहतार्थवाक्
पुण्यवागर्थ्यवागर्द्धमागधीयोक्तिरिद्धवाक् ॥४॥ अनेकांता
दिगेकांतध्वांतनिर्भिन्नयांतकृत् । सार्थवागप्रयत्नोक्तिः प्र
तितीर्थमदघ्नवाक् सप्तभंगिवाक् ॥५॥ अवर्णगीसर्वभाषा
मयगीर्व्यक्तवर्णगीः । अमोघवागक्रमवागवाच्यानंतवागवा

क् ॥६॥ अद्वैतगीः सूनृतगीः सत्यानुभयगीः सुगीः ॥७॥ नव्यैकश्र
मगुः सद्गुश्छिन्नगुः परमार्थगुः प्रशांतगुः प्राश्निकगुः सुगुर्नि
यतकालगुः ॥८॥ सुश्रुतिः सुश्रुतोयाऽप्यश्रुतिः सुश्रुन्महाश्रु
तिः धर्मश्रुतिः श्रुतपतिः श्रुत्युद्धर्त्ताध्रुवश्रुतिः ॥९॥ निर्वाणमा
र्गदिग्मार्गदेशकः सर्वमार्गदिक् । सारस्वतपथस्तीर्थपरमोत्त
मतीर्थकृत् ॥१०॥ देष्टावाग्मीश्वरोधर्मशासकोधर्मदेशकः वागी
श्वरस्त्रयीनाथस्त्रिभंगीशोगिरांपति ॥११॥ सिद्धाज्ञः सिद्धवागाज्ञा
सुसिद्धवाक् ॥१२॥ शुचिश्रवानिरुक्तोक्तिस्तंत्रकृन्न्यायशास्त्रकृ
त् । महिष्टवाग्महानादः कवीन्द्रोदुंदुभिस्वनः । इतितीर्थकृतशतं
नाथः पतिः परिवृढः स्वामिभर्त्ताविभुः प्रभुः ईश्वरोधीश्वरोधी

स०
१६९

शो ऽधीशानो ऽधीशितो ऽधिशिता ॥१॥ अधिदेवो महादेवो देवस्त्रिभु
वनेश्वरः ईशो ऽधिपतिरीशान इनइंद्रो ऽधिपो ऽधिभूः महेश्वरो म
हेशानो महेशः परमेशिता ॥२॥ विश्वेशो विश्वभूतेशो विश्वेट् विश्वे
श्वरो ऽधिराट् ॥३॥ लोकेश्वरो लोकपति विश्वेट् विश्वेश्वरो ऽधिराट्
ल्लोकनाथो जगत्पतिः त्रैलोक्यनाथो लोकेशो जगन्नाथो ज
गत्प्रभुः ॥४॥ पिता परः परतरो जेता जिष्णुरनीश्वरः कर्त्ता प्रभुष्णु
भ्राजिष्णुः प्रभविष्णुः स्वयंप्रभुः ॥५॥ लोकजिद्विश्वजिद्विश्ववि
जेता विश्वजित्तरः जगज्जेता जगज्जैत्रो जगज्जिष्णुर्जगज्जयी
॥६॥ अग्रणीर्ग्रामणीर्न्नेता भुवनेश्वरधीश्वरः धर्म्मनायक ऋद्धी
शो भूतनाथश्च भूतभृत ॥७॥ गतिपाता वृषो वर्य्यो मंत्रकृत शु

भलक्षणः लोकाध्यक्षो दुराधर्षो भव्यबंधुर्निरुत्सुकः ॥८॥ धी
रो जगद्धितो ऽजय्यस्त्रिजगत्परमेश्वरः विश्वासी सर्वलोकेशो विभवो
भुवनेश्वरः ॥९॥ त्रिजगद्वल्लभस्तुंगस्त्रिजगन्मंगलोदयः धर्म्मचक्रा
युधः सद्योजातस्त्रैलोक्यमंगल ॥१०॥ वरदो ऽप्रतिघो ऽच्छेद्यो दृढीयान
भयंकरः महाभोगो निरौपम्यो धर्म्मसाम्राज्यनायक ॥११॥ इति न
थशतं ॥ योगी प्रव्यक्तनिर्वेदः साम्यारोहणतत्परः सामायिकी सा
मायिको निःप्रमादो ऽप्रतिक्रमः ॥१॥ यमः प्रधाननियमः स्वभ्यस्तप
रमासनः प्राणायामचणः सिद्धप्रत्याहारो जितेंद्रियः ॥२॥ धारणा
धीश्वरो धर्म्मध्याननिष्ठः समाधिराट् स्फुरत्समरसीभाव ए
कीकरणनायक ॥३॥ निर्ग्रंथनाथो योगींद्र ऋषिः साधुर्यतिर्मु

नि:महर्षि:साधुधौरेयो यतिनाथोमुनीश्वर:॥४॥ महामुनिर्म्म
हामौनी महाध्यानी महाव्रती महाक्षमोमहाशीलोमहाशांतो
महादम:॥५॥ निर्लेपोनिर्भ्रमस्वांतोधर्म्माध्यक्षोदयाध्वज:ब्रह्म
योनि:स्वयंबुद्धोब्रह्मज्ञोब्रह्मतत्वविद्॥६॥ पूतात्मास्नातकोदांतो
तदंतोवीतमत्सर:धर्म्मवृक्षायुधोक्षोभ्य:प्रपूतात्मामृतोद्भव:
॥७॥ मंत्रमूर्त्ति:स्वसौम्यात्मास्वतंत्रोब्रह्मसंभव:सुप्रसन्नोगुणां
भोधि:पुण्यापुण्यनिरोधक:॥८॥ सुसंवृत:सुगुप्तात्मासिद्धात्मानि
रुपप्लव:महोदर्कोमहोपायोजगदेकपितामह:॥९॥ महाकारु
णिकोगुण्यो महाक्लेशांकुश:शुचि:अरिंजय:सदायोग:स
दाभोग:सदाधृति:॥१०॥ परमौदासितानाश्वान्सत्याशी:शांत

नायकाऽपूर्ववैद्योयोगज्ञोधर्म्ममूर्त्तिरधर्म्मधक्॥११॥ ब्रह्मेट्
महाब्रह्मपति:कृतकृत्य:कृतक्रतु:गुणाकरोगुणोच्छेदी निर्न्नि
मेषोनिराश्रय:॥१२॥ सूरि:सुनयतत्वज्ञो महामैत्रीमय:शमीप्रक्षी
णबंधोनिर्द्वंद्व:परमर्षिरनंतग॥१३॥ इतियोगशतं ८ निर्वाणसाग
र:प्राज्ञैर्म्महासाधुरुदाहृत: विमलाभोथशुद्धाभ: श्रीधरोदत्तइ
पि॥२४॥ अमलाभोप्युद्धरोग्नि:संयमश्चशिवस्तथापुष्पांजलि:
शिवगण उत्साहोज्ञानसंज्ञक:॥२५॥ परमेश्वरइत्युक्तोविमलेशो
यशोधर:कृष्णोज्ञानमति:शुद्धमति:श्रीभद्रशांतयुक्॥२६॥ वृष
भस्त्वजित:संभवश्चाभिनंदन:मुनिभि:सुमति:पद्मप्रभ:
प्रोक्त:सुपार्श्वक:॥२७॥ चंद्रप्रभ:पुष्पदंत:शीतल:श्रेयसाह्वय:

सह० १५१

वासुपूज्यश्च विमलोनंतजिद्धर्म इत्यपि ॥१८॥ शांतिः कुंथुररो मल्लिः सुव्रतोनमिरित्यतः नेमिः पार्श्वो वर्द्धमानो महावीरः सुवीरकः ॥१९॥ सन्मतिश्चापि कथ्यते महतिमहावीर इत्ययं महापद्मः सूरदेवः सुप्रभश्च स्वयंप्रभः ॥२०॥ सर्वायुधो जयदेवो भवेदुदयदेवकः प्रभादेवश्चोदंकश्च प्रश्नकीर्तिर्जयाभिधः ॥२१॥ पूर्णबुद्धिर्निःकषायो विज्ञेयो विमलप्रभः बहलो निर्म्मलश्चित्रगुप्तः समाधिगुप्तकः ॥२२॥ स्वयंभूश्चापि कंदर्पो जयनाथ इतीरितः श्रीविमलो दिव्यवादो नंतवीरोप्युदीरितः ॥२३॥ पुरुदेवोथ सुविधिः प्रज्ञापारमितोव्ययः पुराणपुरुषो धर्म्मसारथिः शिवकीर्तनः ॥२४॥ विश्वकर्म्माक्षरोछद्मा विश्वभूर्विश्वनायकः दि

गंबरो निरातंको निरारेको भवांतकः ॥२५॥ दृढव्रतो नयोत्तुंगो निष्कलंको कलाधरः सर्वक्लेशापहोक्षय्यः क्षांतः श्रीवृक्षलक्षण ॥२६॥ इति निर्वाणशतं ७ ब्रह्मा चतुर्मुखो धाता विधाता कमलासनः अब्जभूरात्मभूः स्रष्टा सुरज्येष्टः प्रजापतिः ॥१॥ हिरण्यगर्भो वेदज्ञो वेदांगो वेदपारगः अजो मनुः शतानंदो हंसयानस्त्रयीमयः ॥२॥ विष्णुस्त्रिविक्रमः सौरिः श्रीपतिः पुरुषोत्तमः वैकुंठः पुंडरीकाक्षो हृषीकेशो हरिः स्वभूः ॥३॥ विश्वंभरोसुरध्वंसी माधवो बलिबंधनः अधोक्षजो मधुद्वेषी केशवो विष्टरश्रवाः ॥४॥ श्रीवत्सलांछनः श्रीमानच्युतो नरकांतकः विष्वक्सेनश्चक्रपाणिः पद्मनाभो जनार्द्दनः ॥५॥ श्रीकंठः शंकरः शंभुः

कपालीवृषकेतनः मृत्युंजयो विरूपाक्षो वामदेवस्त्रिलोचनः
६ उमापतिपशुपतिः स्मरारिस्त्रिलोचनः ७ उमापतिपशुपतिः
स्मरारिस्त्रिपुरांतकः अर्द्धनारीश्वरो रुद्रो भवो भर्गः सदाशिवः
८ जगत्कर्त्तांधकारातिरनादिनिधनो हरः महासेनस्तारक
जिद्गणनाथो विनायकः ९ विरोचनो वियद्रत्नं द्वादशात्मा वि
भावसुः द्विजाराध्योद्दहज्ञानुः श्वित्रभानुस्तनूनपात् १० द्विजा
राध्योद्दहज्ञांनुः श्वित्रभानुस्तनूनपात् ११ द्विजराजः सुधांशो
षिरोषधीशः कलानिधिः नक्षत्रनाथः शुभ्रांशुः सोमः कुमुदबां
धवः १२ लेखर्षभोऽनिलः पुण्यजनः पुण्यजिनेश्वरः धर्म्मरा
जो गिराजः प्रचेताः सुमिनंदनः १३ सिंहकांततयच्छायानं

दनो वृहतांपतिः सर्वदेवोपदेष्टा च द्विजराजसमुद्भव १४ इति ब
लस्तंतं बुद्धो दशबलः शाक्यः षडभिज्ञस्तथागतः समंतभद्रः
सुगतः श्रीघनो भूतकोटिदिक् १ सिद्धार्थो मारजिच्छायाद्व
णिकैकसुलक्षणः बोधिसत्वो निर्विकल्पदर्शनो द्वयवाद्यपि
२ महाकृपालुर्नैरात्म्यवादी संतानशासकः सामान्यलक्षणः
चणः पंचस्कंधमयात्मदृक् ३ भूतार्थभावनासिद्धः चतुर्भूमिक
शासनः चतुरार्य्यसत्यवक्ता निराश्रयचिदन्वयः ४ योगो वैशे
षिकस्तुच्छाभावनित्यदपदार्थदृक् नैयायिकः षोडशार्थवा
दी पंचार्थवर्णक ५ ज्ञानांतराध्यक्षबोधः समवायवशार्थभि
त मुक्तैकसाध्यकर्म्मांता निर्विशेषगुणामृतः ६ सांख्यः स

मीक्षः कपिलःपंचविंशतत्ववित् व्यक्ताव्यक्तज्ञविज्ञानीज्ञा
नचैतन्यभेदहृत् अस्वसंविदितज्ञानवादीसत्कार्यवादि
सात् त्रिःप्रमाणोऽक्षप्रमाणःस्यादहंकारिकाक्षदिक् क्षेत्र
ज्ञआत्मापुरुषोनरोनाचेतनःपुमान्अकर्त्तानिर्गुणोऽमूर्त्तो
भोक्तासर्वगतोऽक्रियः द्रष्टातटस्थःकूटस्थोज्ञातानिर्बंधनो
भवः बहिर्विकारोनिर्मोक्षःप्रधानंबहुधानकं प्रकृतिः
ख्यातिरारूढप्रकृतिःप्रकृतिप्रियःप्रधानभोज्योऽप्रकृतिर्वि
रूपोविकृतिःकृती मीमांसकोऽस्तसर्वज्ञःश्रुतिपूतःसदो
त्सवपरोक्षज्ञानवादीषट्पावकःसिद्धकर्म्मकः चार्वाकोभौ
तिकज्ञानोभूताभिव्यक्तचेतनःप्रत्यक्षैकप्रमाणोऽस्तपरलो

कोगुरुश्रुति।३।पुरंदरविद्धकर्णोवेदांतीसंविदद्वयी।शब्दाद्वै
तीस्फोटवादीपाषंडघ्नोनयौघयुक्।।१७।।इतिबुद्धशतं।।अंतकृ
त्पारकृत्तीरप्राप्तःपारेतमस्थितः।त्रिदंडीदंडितारातिज्ञानकर्म्म
समुच्चयी।१।संहृतध्वनिसूक्ष्मयोगःसमाप्तार्णवोपमः।योगस्ने
हापहोयोगकिट्टनिर्लेपनोद्यतः।२।स्थितस्थूलवपुर्योगोगी
र्मणोयोगकार्श्यकःसूक्ष्मवाक्चित्तयोगस्थःसूक्ष्मीकृतवपु
:क्रियः।३।सूक्ष्मकायक्रियास्थायीसूक्ष्मवाक्चित्तयोगहाःएक
दंडीचपरमहंसःपरमसंवर।४।नैःकर्म्मसिद्धःपरमनिर्जरःप्रज्व
लत्प्रभःमोघकर्म्मात्रुटत्कर्म्मपाशःशैलेशयलंकृतः।५।एका
काररसास्वादोविश्वाकाररसाकुलःअजीवन्नमृतोजाग्रद

सुप्तःश्लन्पतामयः ।६। श्रेयानयोगीचतुरशीतिलक्षगुणोगुणः
निःपीतानंतपर्य्यायो विद्यासंस्कारनायकः ।७। इष्टोनिर्व्वच
नीयोणुरणीयाननुराप्रियः प्रेष्टःस्थेयान्स्थिरोनिष्टःश्रेष्टो
ज्येष्टःसुनिष्ठितः ।८। भूतार्थशूरोभूतार्थदूरःपरमनिर्गुणःव्य
वहारसुषुप्तोतिजागरूकोतिसुस्थितः ।९। उदितोदितमहा
त्मोनिरुपाधिरकृत्रिमः अमेयमहिमात्यंतशुद्धःसिद्धिस्व
यंवरः ।१०। सिद्धानुजः सिद्धपुरीपांथः सिद्धिगुणातिथिः सिद्ध
संगोन्मुखः सिद्धालिंग्यः सिद्धोपगूहकः ।११। पुष्टोष्टादशस
हस्रशीलाश्वः पुण्यसंवलः वृत्ताग्रसुप्तः परमशुक्ललेश्यो
पचारकृत् ।१२। क्षेपिष्टोंत्यक्षणसखापंचलघ्वक्षरस्थितिं ।

क्षमप्रतिप्रकृत्यासीत्त्रयोदशकलिप्रणुत् ।१५। अवेदोयाजको
यज्योयाज्योनग्निपरिग्रहः अनग्निहोत्रीपरमनिःस्पृहोत्यंत
निर्दयः ।१६। अशिष्योशासकोदीक्ष्योदीक्षकोदीक्षितोक्षयः
अगम्योगमकोरम्योरमकोज्ञाननिर्भरः ।१७। इत्यंतकृच्छतं ।१०
महायोगीश्वरोद्रव्यसिद्धोदेवोपुनःभवः ज्ञानैकचिज्जीवघनः
सिद्धोकाग्रगामुकः ।१८। इत्यंताष्टकंएवमेकत्र १००८ इदमष्टोत्त
रंनाम्नां सहस्रंभक्तितोर्हतां योनंतानामधीतेसौमुक्त्यंतांभु
क्तिमश्नुते ।१९। इदंलोकोत्तमंपुंसामिदंसरणमुल्वणं इदंमंग
लमग्रीयमिदंपरमपावनं ।२०। इदमेवपरंतीर्थमिदमेवेष्टसा
धनं इदंमेवाखिलक्लेशसंक्लेशक्षयकारणं ।२१। एतेषामेक

सह०
२७५

मप्यर्हन्नाम्नामुच्चारयन्नघैः मुच्यते किं पुनः सर्वाण्यर्थज्ञ
स्तु जिनायते ॥१२॥ इत्याशाधरकृतजिनसहस्रनामसंपूर्णं
अथ लघुसहस्रनाम लिख्यते ॥ नमस्त्रैलोक्यनाथाय सर्वज्ञा
य महात्मने वक्ष्ये तस्यैव नामानि मोक्षसौख्याभिलाषया ॥१॥
निर्म्मलः शाश्वतो बुद्धो निर्विकल्पो निरामयः निःशरीरो निरा
तंकः सिद्धः सूक्ष्मो निरंजनः ॥२॥ निःकलंको निरारंभो निर्म्मो
हो निर्मलो ऽक्षमः निर्भयो निरहंकारो निर्विकारो ऽथ निःक्रियः
॥३॥ निर्दोषो नीरजाः शांतो निर्द्वंद्वो निर्ममः शिवः निस्तरंगो नि
राकारो निःकर्मा निःकलः प्रभुः ॥४॥ निर्वेदो ऽनुपमज्ञानी नीरागो
निरघो जिनः निःशब्दो ऽशतिमः श्रेष्ठः ज्येष्ठो ज्ञानगोचरः ॥५॥ निः

संगः प्राप्तकैवल्यो नैष्ठिकः शब्दवर्जितः अनवद्यो महाप्रज्ञो ऽज
गच्छिखरशेखरः ॥६॥ निःशब्दो गुणसंपन्नः पापतापप्रणाशनः
सूपयोगः श्रुतं प्राप्तः घातिकर्मबलापहः ॥७॥ अजरश्चामरः
सिद्धो ऽप्यचिंत्यो ऽप्यक्षयो विभुः अमूर्तश्चाच्युतो ब्रह्मा विष्णुरीशः
प्रजापतिः ॥८॥ अनिंद्यो विश्वनाथश्चाप्रमेयो ऽनुपमो ऽभवः अ
विभेद्यो जगन्नाथो बोधरूपो जितात्मकः ॥९॥ अव्ययः सकला
राध्यो निःपन्नो ज्ञानलोचनः अछेद्यो निर्मलो नित्यः सर्वसंक
ल्पवर्जितः ॥१०॥ अजेयः सर्वतोभद्रो निःकषायो भवांतकः वि
श्वनाथः स्वयंबुद्धो वीतरागो जिनेश्वरः ॥११॥ अंतकः सहजानंद
श्चावाङ्मनसगोचरः आराध्यः शुद्धचैतन्यः कर्मनोकर्मवर्जि

तः ।२२। अनंतो विमलज्ञानी निस्पृहः स्वप्रकाशकः कर्माजि
तो महात्मा च लोकत्रयशिरोमणिः ।२३। अव्याबाधो वरः शं
भुर्विश्वदेवी पितामहः सर्वभूतहितो देवः सर्वलोकशरण्यकः
।२४। अष्टकर्मविनिर्मुक्तः सप्तधातुविवर्जितः गाखांदित्रया
ह्वरः सर्वज्ञानायसंयुतः ।२५। आनंदरूपश्चैतन्यो भगवान्त्रि
जगद्गुरुः । अनंतानंतधीशक्तः सूक्ष्मो व्यक्तो व्ययात्मकः ।२६।
अभवः प्राप्तकैवल्यो निर्मानो निरपेक्षकः । निष्कलः केवलज्ञा
नी मुक्तिसौख्यप्रदायकः ।२७। अनामयो महाराध्यो वरदो
ज्ञानपावनः सर्वज्ञः सत्सुखावासो जिनेंद्रो मुनिसंस्तुतः ।२८।
अन्यूनः केवलज्ञानी विश्वतत्वप्रकाशकः प्रबुद्धो भगवान्नाथ

प्रशास्तः पुण्यकारणः ।२१। शंकरः सुगतोस्फद्भः सर्वज्ञो मदनांत
कः ईश्वरो भुवनाधीशः सविता पुरुषोत्तमः ।२२। सद्योजातो महा
त्मा च विमुक्तो मुक्तिवल्लभः योगीन्द्रो नादिसंसिद्धो निरीहो ज्ञानलो
चनः ।२३। सदाशिवश्च सर्वज्ञः सत्सौख्यस्त्रिपुरांतकः त्रिनेत्रस्त्रिज
गद्रूपश्चाष्टमूर्त्तिः कलायुतः ।२४। सर्वसाधकजनैर्वंद्यः सर्वपाप
विवर्जितः सर्वदेवाधिको देवः सर्वभूतहितंकरः ।२५। स्वसंवेद्यो
महात्मा च प्रसिद्धः पापनाशनः तनुमात्रश्चिदानंदश्चिद्रूपश्चि
न्मयो नयः ।२६। स्वदेहप्रमितो ज्ञाना चेतना चेतनात्मकः सकला
तिशयाधारो मुक्तिमान्महतां महः ।२७। महादेवो महावीरो मह
मोहविनाशकः महाभावो महासिद्धो महामुक्तिप्रदायकः ।

२७ महाज्ञानी महायोगी महातपा महात्मकः महर्द्धिको महा
वीर्य्यो महार्हत्पपदेस्थित २८ महापूज्यो महावंद्यो महाविघ्नवि
नाशकः महासौख्यो महाजंसो महा मदिमहास्तुतः २९ मुक्तो
मुक्तैकसद्वेषएको नैको विनश्वरः सर्वद्वंद्वविनिर्मुक्तः सर्वा
लोकैकपावन ३० महाधीरो महाधीरो महादुःखविनाशकः म
हामुक्तिपदाधीशो महावंद्यो महागुरुः ३१ कामारिर्मारविध्वं
सी निष्कामो विषयोज्झितः जगद्वांछ्रगतभ्रांतिः शांतः कल्याण
कारकः ३२ परमात्मा परंज्योतिः परमेष्ठी परेश्वरः परमात्मा प
रानं[illegible]परंपरमपावनः ३३ प्रव्यक्तोऽनंतविज्ञानः साद्यान्नि
र्वाणसंस्तुतः नाकृतिर्नक्षिरो वर्णो व्योमरूपो जितात्मकः ३

४। व्यक्ताव्यक्तज्ञसंवेदी संसारछेदकारणः निस्वद्यो महाराध्य
कर्मजिद्धर्मनायकः ३५ बोधमात्रिजगद्वंद्यो विश्वात्मा नरकां
तकः स्वयंभूः पापहृद्रूपः पुनानो विनवस्तुतः ३६ वर्णातीत
तो मदातीतो रूपातीतो निरंजनः अनंतज्ञानसंपन्नो देवेशो
देवनायकः ३७ वरणपो भवविध्वंसी योगिनां ज्ञानगोचरः ज
न्ममृत्युजरातंकः सर्वविघ्नहरो हर ३८ विश्वदृग्भव्यसंसक्तस्य
:पवित्रो गुणसागरः प्रसन्नो परमाराध्यो लोकालोकप्रकाशकः
३९ रत्नगर्भो जगत्स्वामी शक्रवंद्यः सुरार्चितः निःप्रपंचो निरा
तंको निःशेषक्लेशनाशनः ४० लोकेशो लोकसंसेव्यो लोका
लोकविलोकनः लोकोत्तमस्त्रिलोकेशो लोकाग्रशिखरस्थि

DR. ... MEMORIAL

तः॥४८॥नामाष्टकंसहस्राणांयेपठंतिदिनेदिनेतेनिर्वाणपदंयां
तिमुख्यंतेनात्रसंशय॥४९॥इतिश्रीसहस्रनामस्तवनसमा॥
प्त॥ अथपार्श्वनाथस्तोत्रलिख्यते॥ब्राह्मीसुंदरिवालिका
भगवतीराजीमतीद्रोपदीकौसल्याचमृगावतीचसुलसासीता
सुभद्राशिवाकुंतीसीलवतिनलस्यदयितापद्मावतीचचंदना
मुरदेव्याधिकसुंदरीजिनमुखीकुर्वंतुवोमंगलं॥१॥अजस्र
मरपारंमारदुर्वारवारंगलितवहलखेदंसर्वतत्वानुवेदंकम
ठमदविदारंसूरिसिद्धांतसारंविगतद्वंदजिनयुथनौमिहंपा
र्श्वनाथं॥२॥प्रहतमदनचापंकेवलज्ञानरूपंमकरतमणि
देहंसौम्यजीवानगेहंसुचरितगुणभूरंपंचसंसारदूरंविगत

द्वंदजिनयुथनौमिहंपार्श्वनाथं॥२॥सकलसुजनभूतोधौतनि
शेषतापंभवगहनकुठारंसर्वदुषापहारंअस्खलितमनुका
शंघातिघातघनाशंविगतद्वंदजिनयूथनौमिहंपार्श्वनाथं॥३॥
असदसमहिमानंभूपमानंचमानंत्रिभुवनवननेशंक्लेशव
ल्लीकृतांशंस्वमनध्रतमुनीशंप्रस्फुरद्बुद्धप्रकाशंविगतद्वंदजिन
युथनौमिहंपार्श्वनाथं॥४॥गतमदकरमोहंदिव्यनिर्घोषमोहं
विधुततिमिरजालंमोहमल्लप्रमल्लंविलसदमलकायंमुक्ति
धामरूपगेहंविगतद्वंदजिनयुथनौमिहंपार्श्वनाथं॥५॥सुभगद्वे
षभराद्भयोगिनाध्यानपुंजंत्रुटितजनभवंधंसाधुलोकप्र
वोधंभयविगलितमोहंभ्रांतिमिथ्याविपक्षंविगतद्वंदजिनयु

थनौमिहंपार्श्वनाथं॥६॥ अनुपमसुखसुर्त्तिप्रातिहार्याष्टयुक्तं
खचरनरसुरेशंपंचकल्याणकोसं ध्वतिफणिमणिदीपंसर्व
जीवानुकंपं विगतहटजिनयूथनौमिहंपार्श्वनाथं॥७॥ अमर
गणनृपालकिन्नरीनाद्यशालं फणिपविहृतिसेवंदेवराजा
धिदेवं असमवलनिवासंमुक्तिकांताविलासं विगतहटजिन
यूथनौमिहंपार्श्वनाथं॥८॥ मदनमदहरश्रीवीरसेनस्यशिष्ये
सुजनगवचनहृदराजसेनप्रपातं जपतिपठतिनित्यंपार्श्वना
थकंपसजवतिशिवसौख्यंमुक्तिश्रीशांतिनाथं विगतहटजि
नयूथनौमिहंपार्श्वनाथं॥९॥ इतिश्रीपार्श्वनाथस्तोत्रसं
पूर्णं॥ अथवर्द्धमानस्तोत्रलिख्यते॥ विदास्पदार्हत्पपदंप

दंपदं प्रत्यग्रसत्यज्ञपरंपरंपरं देयेतराकारखुधंखु धंखुधं वि
रक्तवेविश्वहितंतंहितं॥१॥ दिव्यंवचोयस्यसभासभासभा
निपीयपीयूषमितंमितंमितं वव्रेवटक्षासुरासुरासुरा विरक्तवे
विश्वहितं॰॥२॥ शाक्तप्रमानैरजिताजिताजिता गुणावलीयेन
धृताधृताधृता मनंदिनंतीर्थकरंकरंकरं विर॰॥३॥ मयूखमाले
वमहामहामहा लोभविकारंसविताविताविता विभातियेनां
धकटीकटीकटी विर॰॥४॥ सरागसंस्कृत्यगुणंगुणंगुणं समाज
मिक्षुंसशिवंशिवंशिवं लक्ष्मीवतांपुङ्पतमंतमंतमंत विर॰॥५॥
सिद्धार्थसन्नंदनमानमानमान नंदाध्ववर्षेशुसदासदासदा
यस्योपरिष्टात्कुसुमंसुमंसुमं विर॰॥६॥ प्रत्यक्षमध्येदधितंधितं

कर्द० ऽचितं यो मेयमर्थं सकलंकलंकलं व्यपेतदोषावरणंरणंरणं
२५० वीर०॥७॥ चित्रीयितां ख्येयमरंमरंमरं संख्यावतां चितहरंहरंह
रं युक्त्यागमाबाधिगिरिं गिरंगिरं विरक्तवेविश्वहितं हितंहि
तं ॥८॥ अध्यौष्टागममध्यगीष्टपरमं शाब्दं च युक्तिं विदां यश्चेयः
परिशीलितवादिमदमिद्देवागमालंकृतिं विद्यमानंदिमुवाम
रादियशसा तेन मुना निर्मितं वीरार्हत्परमेश्वरस्य यमकस्तो
त्रार्थकं मंगलं ॥९॥ भट्टारकैः कृतं स्तोत्रं यः पठेद्यमकाष्टकं स
र्वदा स भवेज्ज्ञो भारतीमुखदर्प्पण ॥१०॥ इति श्री अमरकी
र्त्ति विरचित वीरस्तोत्र यमकबंधसंपूर्ण ॥ अथ लघु सामा
यक लिख्यते ॥ सिद्धिवस्तुवचो भक्त्या सिद्धान् प्रणमतः सदा

सिद्धकार्याः शिवं प्राप्ताः सिद्धिं ददतु नोऽव्ययं ॥१॥ नमोस्तु धूतपापेभ्यः
सिद्धेभ्यः ऋषिसंसदि सामायिकं प्रपद्येहं भवभ्रमनसूदनं ॥२॥
साम्यं मे सर्वभूतेषु वैरं मम न केनचित आशाः सर्वाः परित्यज्य स
माधिमहमाश्रये ॥३॥ रागद्वेषममत्वाद्वाहा मयाये विराधिता क्ष
मंतु जंतवस्ते मे तेभ्यः क्षमाम्यहं पुनः ॥४॥ मनसा वपुषा वाचा कृत
कारितसम्मतैः रत्नत्रयभवं दोषं मोह निंदामि वर्जये ॥५॥ तिरश्चां
मानवं दैवमुपसर्गं सहेधुना कायाहारकषायादीन् प्रत्यज्या
मि त्रिशुद्धितः ॥६॥ रागद्वेषं भयं शोकं प्रहर्षोत्सुकदीनता व्युत्सृ
जामि त्रिधा सर्वमरतिं रतिमेव च ॥७॥ जीविते मरणे लाभेऽलाभे
योगे विपर्यये बंधावरौ सुखे दुःखे सर्वदा समता मम ॥८॥ आत्मै

निर्वा-
२८१

वमेसदाज्ञानेदर्शनेचरणेतथा॥ प्रत्याख्यानेनमात्मैवतथासंव
रयोगयो॥ २०॥ एकोमेशाश्वतश्चात्मा ज्ञानदर्शनलक्षणः॥ शेषा
वहिर्भवाभावासर्वेसंयोगलक्षणा॥ २१॥ संयोगमूलंजीवेनप्राप्त
दुःखपरंपरा॥ तस्मात्संयोगसंबंधंत्रिधासर्वंत्यजाम्यहं॥ २२॥ एवं
सामायिकात्सम्यक्सामायिकमखंडितं। वर्त्तंतांमुक्तिमानम्याः
वशीभूतायतेनमः॥ २३॥ इतिश्रीलघुसामायकसंपूर्णं॥
॥ अथनिर्वाणकांडलिख्यते॥ अठ्ठावयम्मिउसहो चंपाएवा
सुपुज्जजिणणाहो उज्जंतेणेमिजिणोपावाएणिव्वुदोमहावी
रो॥ १॥ वीसंतुजिणवरिंदोअमरासुरवंदिदाधुदकिलेसा॥ स
म्मेदेगिरिसिहरेणिव्वाणगयाणमोतेसिं॥ २॥ वरदत्तोयवरंगो

सायरदत्तोयतारवरणयरे। आहुठकोडिसहिया। णिव्वाणगया
णमोतेसिं॥ ३॥ णेमिसामिपज्जुणो संबुकुमारोतहेवअणिरु
द्धो। बाहत्तरिकोडीउ उज्जंतेसत्तसयासिद्धा॥ ४॥ रामसुयाविण्णिज
णा। लाडणरिंदाणपंचकोडीउ पावागिरिसिहरे। णिव्वाणगया
णमोतेसिं॥ ५॥ पंडुसुवातिण्णिजणादविडणरिंदाणअठ्ठकोडीउ
सेत्तुंजयगिरिसिहरे णिव्वाणगयाणमोतेसिं। संतेजेबलिभद्दा
जदुवणरिंदाणअठ्ठकोडीउगजपंथेगिरिसिहरे णिव्वाणगया
णमोतेसिं॥ ६॥ रामहणूसुग्गीवो गवयगवाक्खोयणीलमहणीलो
णवणवइकोडीयोतुंगीगिरिणिव्वुदे णिव्वाणगयाणमोतेसिं॥ ७॥ णं
गाणंगकुमारा कोडीपंचद्धमुणिवरेसहिया सवणगिरिवरसि

णि०
२८२

हरे णिव्वाणगयाणमोतेसिं ॥१८॥ दहमुहरायस्ससुवाकोडिपंचद्ध
मुणिवरेसहियारे वाउयतडग्गे णिव्वाणगयाणमोतेसिं ॥१९॥ रेवा
णइयरतीरे पछिमभायम्मिसिद्धवरकूडे दोचक्कीदहकप्पेआ
हुठकोडिणिव्वुदेवंदे ॥२०॥ वडवाणीवरणयरेदखिणभायम्मिचू
लिगिरिसिहरे इंदजियकुंभयणो णिव्वाणगयाणमोतेसिं ॥२१॥
पावागिरिवरसिहरे सुवण्णभद्दाइमुणिवराचउरे चलणाणइय
तडग्गे णिव्वाणगयाणमोतेसिं ॥२२॥ फलहोडीवरगामेपछिमभा
यंम्मिदोणगिरिसिहरे गुरुदत्तादिमुणिंदा णिव्वाणगयाणमोते
सिं णायकुमारमुणिंदो वालमहावालछेयअज्झेया अठावय
गिरिसिहरे णिव्वाणगयाणमोतेसिं ॥२३॥ अचलपुरवरणियडे ई

साणभायम्मिमेढगिरिसिहरे आहुठकोडीउ निव्वाणगया
णमोतेसिं ॥२४॥ वंसथलवरणियडे पछिमभायंम्मिकुंथगिरि
सिहरे कुलदेशभूसणमुणीणा णिव्वाणगयाणमोतेसिं ॥२५॥
जसहररायस्ससुवा पंचसयाइंकलिंग देसम्मिकोडिसिला
कोडिमुणी णिव्वाणगयाणमोतेसिं ॥२६॥ पासस्सदसमवसरणेस
हिया वरदत्तमुणिवरापंच रिसिंदेगिरिसिहरे णिव्वाणगया
णमोतेसिं ॥२७॥ पासंतहअहिणंदणणायद्दहिमंगलपुरवंदेआ
सारम्मेपट्टणिमुणिसुव्वउतहेववंदामि ॥२८॥ वाहुवलीतहवंदा
मिपोयणपुरिहछिणायपुरिवंदे संतिकुंथुअरहोवाणारसी
हिसुपासपासंच ॥२९॥ महुराएअहिछत्तेवीरंपासंतहेववंदामि

MEMORIAL

१८३

जंबुसुणिंदोवंदामि णिव्वुइपत्तोविजंबुवणगहणे ॥२२॥ पंचक
ल्लाणवाणइजाणि विसंजादमच्च लोयम्मि मणवयकाय
विसुद्धीसव्वेसिरसाणमंसामि ॥२३॥ अग्गलदेवंवंदामि पंच
सयधणुहदेहउच्चंतं देवाकुणंति विट्ठी केसरकुसुमाण
तस्सउवरम्मि ॥२४॥ णिव्वाणवाणजाण विज्झइसव्वेसिरसाण
मंसामि ॥२५॥ जोपढइइयतियालं णिव्वुइकंवंजावसुद्धीएभुंज
विणरसुरसुक्खं पच्छासोलहइणिव्वाणं ॥२६॥ इतिश्री णिर्व्वा
णकांडसंपूर्णं ॥१॥ ॥ अथभक्तामरस्तोत्रजीकीभाषा
लिष्यते ॥ आदिपुरिष आदीसजिन आदिपुरिषआदीसु
बुधिकरतार धर्मधुरंधरपरमगुरु नमोआदिअवतार ॥१॥

चौपई ॥ सुरनरमुकटरतनछविकरैं अंतरपापतिमिरसवहरैं
जिनपदवंदौमनवचकाय भवजलपतितउधरनसहाय ॥२॥
श्रुतपारगइंद्रादिकदेव जाकीथुतिकीनीकरिसेव सवदम
नोहरअर्थविसाल तिसप्रभुकीवरनौंगुनमाल ॥३॥ विवुधवंद्यप
दमैंमतिहीन होयनिलजथुतिमनसाकीन जलप्रतिविंब माल ४
तवुधकोगहै ससिमंडलवालकहीचहै ॥४॥ गुणसमुद्रतुव
गुनअविकार कहतनसुरगुरुपावैपार प्रलयपवनउधत
जलजंत जलधितरैकोभुजवलवंत ॥५॥ सोमैंशक्तिहीनस्तु
तिकरौं भक्तिभावतस्यकछुनहींडरौं जोमृगनिजसुतपाल
नहेत मृगपतिसनमुषजायअचेत मैंसवसुधीहसनकोधाम

भ॰मा॰
१८४

मुक्ततुवभक्तिवुलावैरांम। ज्यौंपिकआंबकलीपरनाव। म
धुरितिमधुकरकरैआराव।१७। तुमजसजंपतजनछिनमांहि
जनमजनमकेपापनसांहि। ज्यौंरविउदैफाटैततकाल। अ
लितवतनीलनिशातमजाल।१८। तुमप्रभावतैंकरसंविचार
होसीयहथुतिजनमनहार। ज्यौंजलकमलपत्रमैंपरैं। मु
क्ताफलकीदुतिविस्तरै।१९। तुवगुनमहिमाहतदुषदोष
सोवैंदूरिरहोसुषपोष। पापविनाशकहैजतुनांम। कमल
विकासैज्यूंरविधांम।२०। नहिअचंभजोहोहिंतुरंत। तुमसेतु
मगुनवरनतसंत। जोअधीनकोंआपसमान। करहिंनसो
नंदितधनधांन।२१। इकटगजनतुमकौंअवलोय। औरवि

षैरतिकरैनकोय। क्यूंकरिषीरजलधिकरिपांन। क्षारनीरपी
वैमतिमान।२२। प्रभुतुववीतरागगुनलीन। जिनपरमांनदेह
तुमकीन। हैतितनहीतिनतेपरवांन। जातैंतुमस्वरूपमनिआं
न।२३। कहांतुममुषअनुपमअविकार। सुरनरनागनयन
मनहार। कहांचंद्रमंडलसकलंक। दिनमैंढाकपत्रसमरंक
।२४। पूरनचंदज्योतिछविवंत। तुमगुनतीनजगतघंलंत। ए
कनाथजेतुमआधारि। तिनविचरतिकोसकैनिवारि।२५। जो
सुरतियविभ्रमआरंभ। मननडिगोतुमनअचंभ। अचलचला
वैप्रलयसमीर। मेरुशिषरडिगमगैनधीर।२६। धूमरहितवाती
गतनेह। प्रकाशकत्रिभुवनघरएह। वातगम्यनांहीपरचंड। अ
परदीपतुमवलेअषंड।२७। छिपहुनलिपहुराहुकीछांह

जगतप्रकाशतदेखिनमांहि।धनअनवरतैविनयनिवार
रवितैंअधिककरैगुनसार।१८। सदाउदितवदलीतटमेंहवि
घटनराहुमेहअवरेह।तुमसुषकमलअपूरवचंद जगत
विकाशीजोतिअमंद।१९। निसदिनरविशशिकौंएैंकाम तु
मसुषचंदहरैतववांम।ज्योस्वभावतेंउपजैंनाज।सजलमेघ
तौकौनेंकाज।२०।जोस्ववोधसोहैंतुममांहि।हरिहरआदिक
मैसोनांहि।ज्योउतिमहारत्नमैंहोइ।काचषंडपावैनविसोय
।।२१।।छंदनाराच।।सरागदेवदेषिमैंभला विशेषमानियां।स्व
रूपताहिदेषिवीतरागतूपिछानियां।कछूनताहिदेषतहां
तहांतुहीविशेषिये।मनोज्ञचितचोरऔरभूलिहूनदेषिये
।२२।अनेकपुत्रवंतनीनितंविनीसपूतहै।नतासमांनपूतआ

नमाततैंप्रसूतहैं।दिसाधरंनितारकाअनेककोटिकोगनैं।दि
नेसतेजवंतएकपूर्वहीदिशाजनैं।२३।पुरानहोपुमानहोपुनी
तपुन्यवानहो।कहैमुनीशअंधकारनाशकौंसुभांनहो।महं
ततोहिजांनिकैंनहोयवशपकालकै।नऔरमोदमोक्षपंथ
देवतोहिटालकैं।२४।अनंतनित्यचितकीअगम्यरम्यआदि
हौ।असंख्यसर्वव्यापिविष्णुव्रह्महौअनादिहौ।अनंतकाम
केतुयोगसुद्धसंतमानहौ।अनेकएकज्ञानरूपसुद्धसंतमा
नहौ।२५।तुहीजिनेशवुद्धहौसुवुद्धिकेप्रमांनतैं।तुहीप्रभुवि
धानहौसुमोषपंथधारतैं।नरोतमोतुहीप्रसिद्धअर्थकेविचा
रतैं।२६।नमोंकरौंजिनेशतोहिआपदानिवारहौ।नमोंकरौंसु

वारिजमिराशिसोषदेतहो।नमोनमोजिनेजिनेशतोहिमो
षपंथदेतहो॥२७॥चौपई॥तुमपूरननिजगुनगनभरे।दोष
गर्वकरितुमपरहरे।अवरदेवगनआश्रयपाय।स्वपनदेषै
तुमफिरिआय॥२८॥तरुअशोकतरकिरणउदार।तुमतनसो
भितहैअविकार।मेघपटलज्यौंतेजफुरंत।दिनकरदिपैतिमर
निहंत॥२९॥सिंहासनमणिकिरणविचित्र।तिसपरिकंचनव
रणपवित्र।तुमतनसोभितकिरणविथार।ज्योंरविउदयाच
लरविमहसार॥३०॥कुंदपुहपसितचमरढलंत।कनकवरनतु
मतनसोभंत।ज्योंसुमेरुतटनिर्मलकांति।झरणांझरैनीरउम
गांति॥३१॥ऊंचेरहैसूरदुतिलोप।तीनछत्रतुमदिपहिअगोप।

तीनलोककीप्रभुताकहै।मोतीझालरिसोंछविलहै॥३२॥दुंदु
भिशब्दगहिगंभीर।चहुंदिशिहोयतुम्हारैधीर।तीनभुवनशि
वसंगमकरै।मानौंजयजयरवउच्चरै॥३३॥मंदपवनगंधोदक
इष्ट।विविधकल्पतरुपुहुपसुवृष्टि।देवकरैविगसितदलसार
मानौंद्विजपंकतिअवतार॥३४॥तुमतनभामंडलजिनचंद।सब
दुतिवंतकरतहैमंद।कोटिशंखरवितेजछिपाय।शशिनिर्म
लअतिकरैअछाय॥३५॥स्वर्गमोक्षमार्गसंकेत।परमधरमउ
पदेशनहेत।दिव्यवचनमुषिषिरैअगाध।सबभाषागर्भित
हितसाध॥३६॥दोहा॥विगसतसुवरनकमलदुति।नषदुतिमि
लिचमकांहि।तुमपदपदवीजेधरै।तहांसुरकमलरचांहि

।३७। ऐसी महिमा तुम विषै और धरै नहि कोय सुरिज मैं जो
जोति है नही तारागन सोय ।३८। किंकल्पतस्थल मदअव
लिप्त कपोलमूल अलिकुल झंकारै तिन सुनि सब्द प्रचंड
क्रोध उद्धत मति धारै कालवरन विकराल कालवत सन्मुख
आवै ऐरावत सौं सरस सकल जन भय उपजावै देखि गयं
दन भय करै तुम पद महिमा लीन विपति रहित संपति सहि
त वसै नगति अदीन ।३९। अति मय मत्त गयंद कुंभथल नख
हि विदारै मोती रक्त समेत डारि भूतल सिंगारै वाकी दाढ विसा
ल वदन मैं रसना लोलै भीम भयानक रूप देखि जन थरहर
डोलै ऐसे मृगपति यम तल जो तर आयो होय सरन गहै।

तुव चरन की बाधा करै न कोय ।४०। प्रलय पवन करि उठी अग्नि
